सदृशान् विदधासि, तथा कुरु, तदहं त्वां शासनशतेन योजयिष्यामि।

अथ विष्णुशर्मा तं राजानमूचे—देव! श्रूयतां मे तथ्यवचनम्; नाहं विद्याविक्रयं शासनशतेनापि करोमि, पुनरेतांस्तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि, ततः स्वनामत्यागं करोमि। नाहमर्थलिप्सुर्ब्रवीमि; यतो ममाशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य न किञ्चिदर्थेन प्रयोजनम्, किन्तु त्वत्प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि।

अथासौ राजा तां ब्राह्मणस्यासम्भाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सादरं तान् कुमारान् समर्प्य परां निर्वृतिमाजगाम। विष्णुशर्मणापि तानादाय तदर्थं मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाशा-परीक्षितकारकाणीति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः; तेऽपि तान्यधीत्य मासषट्केन यथोक्ताः संवृत्ताः। ततः प्रभृत्येतत् "पञ्चतन्त्रम्" नाम नीतिशास्त्रं बालावबोधनार्थं भूतले संप्रवृत्तम्।

सत्यमभिहितं मम मात्रा, यत् पुरुषेण कोऽपि सहायः कार्यो नैकाकिना गन्तव्यम्; यतो मया श्रद्धापूरितचेतसा तद्वचनमनुष्ठितम्, तेनाहं कर्कटेन सर्पव्यापादनाद्रक्षितः, अथवा साध्विदमुच्यते—

"मन्त्रे, तीर्थे, द्विजे, देवे, दैवज्ञे, भेषजे, गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी॥"

एवमुक्त्वासौ ब्राह्मणो यथाभिप्रेतं गतः।

कौलिक-व्यन्तर-नापितादिकथा

कस्मिंश्चिदधिष्ठाने मन्थरको नाम कौलिकः प्रतिवसति स्म। तस्य कदाचित् पटकर्माणि कुर्वतः सर्वपटकर्मकाष्ठानि भग्नानि, ततः स कुठारमादाय वने काष्ठार्थं गतः। स च यावद्भ्रमन् समुद्रतटं प्रयातः, तावत् तत्र शिंशपा-पादपस्तेन दृष्टः। ततश्चिन्तितवान्—महानयं वृक्षो दृश्यते, तदनेन कर्तितेन प्रभूतानि पटकरणकाष्ठानि भविष्यन्ति। इत्यवधार्य तस्योपरि कुठारमुत्क्षिप्तवान्। अथ तत्र वृक्षे कश्चिद् व्यन्तरः समाश्रित आसीत्। अथ तेनाभिहितम्—अहो! मदाश्रयोऽयं पादपः सर्वथा रक्षणीयः, यतोऽहमत्र महासौख्येन तिष्ठामि समुद्र-कल्लोल-स्पर्शनाच्छीतवायुनाप्यायितः।

प्रतिदिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः ।
बुद्धिर्बुद्धिमतामपि कुटुम्बभरचिन्तया सततम् ॥
नश्यति विपुलमतेरपि बुद्धिः पुरुषस्य मन्दविभवस्य
घृत-लवण-तैल-तण्डुल-वस्त्रेन्धनचिन्तया सततम् ॥
गगनमिव नष्टतारं शुष्कमिव सरः, श्मशानमिव रौद्रम्
प्रियदर्शनमपि रूक्षं भवति गृहं धनविहीनस्य ॥"

एवं सम्प्रधार्य भूयोऽप्यचिन्तयत्—तदहमनशनं कृत्वा प्राणानुत्सृजामि, किमनेन व्यर्थजीवितव्यसनेन ? एवं निश्चयं कृत्वा सुप्तः ।

अथ तस्य स्वप्ने पद्मनिधिः क्षपणकरूपो दर्शनं दत्त्वा प्रोवाच—भोः श्रेष्ठिन् ! मा त्वं वैराग्यं गच्छ ; अहं पद्मनिधिस्तव पूर्वपुरुषोपार्जितः. तदनेनैव रूपेण प्रातस्त्वद्गृहमागमिष्यामि, तत्त्वयाहं लगुडप्रहारेण शिरसि ताडनीयः, येन कनकमयो भूत्वाक्षयो भवामि ।

अथ प्रातः प्रबुद्धः सन् स्वप्नं स्मरंश्चिन्ताचक्रमारूढस्तिष्ठति—अहो ! सत्योऽयं स्वप्नः, किंवाऽसत्यो भविष्यति न ज्ञायते ; अथवा नूनं मिथ्या भाव्यम्, यतोऽहं केवलं वित्तमेव चिन्तयामि ; उक्तं च—

"व्याधितेन, सशोकेन, चिन्ताग्रस्तेन जन्तुना ।
कामार्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः ॥"

एतस्मिन्नन्तरे तस्य भार्यया कश्चिन्नापितः पाद-प्रक्षालनायाहूतः । अत्रान्तरे च यथानिर्दिष्टः क्षपणकः सहसा

अत्रान्तरे तमाक्रन्दमाकर्ण्य पुरकोट्टपालैरभिहितम्—भो भोः ! किमयं महान् कोलाहलो नगरमध्ये ? तद् गम्यतां गम्यताम् । ते च सर्वे तदादेशकारिणस्तत्सहिता वेगात् तद्गृहं गता यावत् पश्यन्ति, तावद् रुधिर-प्लावितदेहाः क्षपणका नापितगृहात् पलायमाना दृष्टाः, पृष्टाश्च—भोः ! किमेतत् ? ते प्रोचुर्यथावस्थितं नापित-वृत्तान्तम् ।

तैरपि नापितो दृढबन्धनबद्धो हतशेषैः क्षपणकैः सह धर्माधिष्ठानं नीतः । तैर्नापितः पृष्टः—भोः ! किमेतद्भवता कुकृत्यमनुष्ठितम् ? सोऽब्रवीत्—भोः ! किं करोमि ? मया श्रेष्ठि-मणिभद्रस्य गृहे दृष्ट एवं-विधो व्यतिकरः । एतदभिधाय तेषां मणिभद्रवृत्तान्तं यथादृष्टमकथयत् ।

ततस्ते राजपुरुषाः श्रेष्ठिनमाहूय भणितवन्तः—भोः श्रेष्ठिन् ! किं त्वया कश्चित् क्षपणको व्यापादितः ? ततस्तेनापि सर्वः क्षपणक-वृत्तान्तस्तेषां निवेदितः । अथ तैरभिहितम्—अहो ! शूलमारोप्यतामसौ दुष्टात्मा कुपरीक्षितकारी नापितः । तथानुष्ठिते तैरभिहितम्—

'कुदृष्टं, कुपरिज्ञातं, कुश्रुतं, कुपरीक्षितम् ।
तन्नरेण न कर्तव्यं नापितेनात्र यत् कृतम् ॥'

मण्डूक-कृष्णसर्पकथा

अस्ति कस्मिंश्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः। स कदाचिद् दायादैरुद्वेजितोऽरघट्टघटिकामारुह्य कूपात् क्रमेण निष्क्रान्तः। अथ तेन चिन्तितम्—कथं तेषां दायादानां प्रत्यपकारः कर्तव्य इति।

एवं चिन्तयन् बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्ण-सर्पमपश्यत्। तं दृष्ट्वा भूयोऽप्यचिन्तयत्—एनं कृष्ण सर्पं तत्र कूपे नीत्वा सकल-दायादानामुच्छेदं करिष्यामि; उक्तं च—

"शत्रुणा योजयेच्छत्रुं बलिना बलवत्तरम्।
स्वकार्याय, यतो न स्यात् काचित् पीडात्र तत्क्षये॥"

तथा च—

"शत्रुमुन्मूलयेत् प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा।
व्यथाकरं सुखार्थाय कण्टकेनेव कण्टकम्॥"

स एवं विभाव्य बिलद्वारं गत्वा समाहूतवान्—एह्येहि प्रियदर्शन! एह्येहि।

तत् श्रुत्वा सर्पश्चिन्तयामास—य एष मामाह्वयति स स्वजातीयो न भवति, यतो नैषा सर्पवाणी, अन्येन केनापि सह मर्त्यलोके मम सन्धानं नास्ति,

तदत्रैव दुर्गे स्थितस्तावद् वेद्मि कोऽत्र भविष्यति, उक्तं च—

"यस्य न ज्ञायते शीलं, न कुलं, न च संश्रयः।
न तेन सङ्गतिं कुर्यादित्युवाच बृहस्पतिः॥"

कदाचित् कोऽपि मन्त्रवाद्यौषधचतुरो मामाहूय बन्धने क्षिपति? अथवा कश्चित् पुरुषो वैरमाश्रित्य कस्यचित् विपक्षस्यार्थे मामाह्वयति? आह च—भोः! को भवान्?

स आह—अहं गङ्गदत्तो नाम मण्डूकाधिपतिः त्वत्सकाशे मैत्र्यर्थमागतः। तत् श्रुत्वा सर्प आह—भोः! अश्रद्धेयमेतत्, तृणानां वह्निना सह संगमः कः? उक्तं च—

"यो यस्य जायते वध्यः स स्वप्नेऽपि कथञ्चन।
न तत्समीपमभ्येति, तत् किमेवं प्रजल्पसि?"

गङ्गदत्त आह—भोः! सत्यमेतत्, स्वभाववैरी त्वमस्माकम्, परं परपरिभवादहं त्वत्सकाशं प्राप्तः, उक्तं च

"सर्वनाशे च सञ्जाते, प्राणानामपि संशये।
अपि शत्रुं प्रणम्यापि रक्षेत् प्राणान् धनानि च॥"

सर्प आह—कथय, कस्मात् ते परिभवः? स आह—दायादेभ्यः। सर्पोऽब्रवीत्—क्व ते आश्रयः,

वाप्याम्, कूपे, तडागे, ह्रदे वा ? तत् कथय स्वाश्रयम्। तेनोक्तम्—पाषाणचयनिबद्धे कूपे। सर्प आह—अहो ! अपदा वयम्, तर्हि नास्ति तत्र मे प्रवेशः ; प्रविष्टस्य च तत्र स्थानं नास्ति, यत्र स्थितस्तव दायादान् व्यापादयामि, तद्गम्यताम् , उक्तं च—

"यच्छक्यं ग्रसितुं भक्ष्यं, ग्रस्तं परिणमेच्च यत्।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥"

गङ्गदत्त आह—भोः ! समागच्छ त्वम्, अहं सुखोपायेन तत्र तव प्रवेशं कारयिष्यामि ; तथा तस्य मध्ये जलोपान्ते रम्यतरं कोटरमस्ति, तत्र स्थितस्त्वं लीलया मम दायादान् व्यापादयिष्यसि। तत् श्रुत्वा सर्पो व्यचिन्तयत्—अहं तावत् परिणतवयाः, कदाचित् कथञ्चिद् मूषिकमेकं प्राप्नोमि, तत् सुखावहो जीवनोपायोऽयमनेन कुलाङ्गारेण मे दर्शितः ; तद्गत्वा तान् मण्डूकान् भक्षयामीति। एवं विचिन्त्य तमाह—भो गङ्गदत्त ! यद्येवं तदग्रे भव, येन तत्र गच्छावः।

गङ्गदत्त आह—भोः प्रियदर्शन ! अहं त्वां सुखोपायेन तत्र नेष्यामि, स्थानं च दर्शयिष्यामि, परं त्वया अस्मत्परिजनो रक्षणीयः ; केवलं यानहं दर्शयामि, त्वया त एव भक्षणीया इति। सर्प आह—साम्प्रतं त्वं मित्रं जातम्, तन्न भेतव्यम् ; तव वचनेन भक्षणीयास्ते दायादा इति। एवमुक्त्वा बिलान्निष्क्रम्य तमालिङ्ग्य च तेनैव सह प्रस्थितः।

[illegible] मार्गेण [illegible] [illegible] कूपमध्ये कोटरे धृत्वा [illegible] गत्वाभिहिता । अथ [illegible] निःशेषितास्ते [illegible] किञ्चित् भोजनम्, यतोऽहं [illegible] प्राह भद्र [illegible] कृतं त्वया मित्र-कृत्यम्, तत्साम्प्रतमनेन [illegible] मार्गेण गम्यताम् ।

सर्प प्राह भो गङ्गदत्त ! न सम्यगभिहितं त्वया, कथमहं तत्र गच्छामि ? मदीयं बिलदुर्गमन्येन रुद्धं भविष्यति, तस्मादत्रस्थस्य मे मण्डूकमेकैकं स्ववर्गीयं प्रयच्छ नो चेत् सर्वानपि भक्षयिष्यामि । तत् श्रुत्वा गङ्गदत्तो व्याकुलमना अचिन्तयत् अहो किमेतन्मया कृतं सर्पमानयता ! तद् यदि निषेधयिष्यामि, तत्सर्वानपि भक्षयिष्यति, अथवा युक्तमुच्यते—

योऽमित्रं कुरुते मित्रं वीर्याभ्यधिकमात्मनः ।
स करोति न सन्देहः स्वयं हि विषभक्षणम् ॥

तत्प्रयच्छाम्यस्यैकैकं प्रतिदिनं सुहृदमपि, तथा च—

"सर्वनाशे समुत्पन्ने अर्द्धं त्यजति पण्डितः ।
अर्द्धेन कुरुते कार्यं, सर्वनाशो हि दुस्तरः ॥

एवं निश्चित्य नित्यमेकैकमादिशति, सोऽपि च भक्षयित्वा तस्य परोक्षेऽन्यानपि भक्षयति । अथान्यदिने

दिनापयान् मण्डूकान् भक्षयित्वा गङ्गदत्तसुतो यमुनादत्तो नाम मण्डूको भक्षितः। तं भक्षितं मत्वा गङ्गदत्तस्तारस्वरेण धिग्-धिक्-प्रलापपरः कथञ्चिदपि क्रन्दनान्न विरराम; ततः पत्न्या सोऽभिहितः—

किं क्रन्दसि दुराक्रन्द! स्वपक्ष-क्षयकारक!
स्वपक्षस्य क्षये जाते को नस्त्राता भविष्यति?

तदद्यापि विचिन्त्यतामात्मनो निष्क्रमणम्, अस्य वधोपायश्च।

अथ गच्छता कालेन तेन सकलमपि कवलितं मण्डूककुलम्, केवलमेको गङ्गदत्तस्तिष्ठति। ततः प्रियदर्शनेन भणितम्—भो गङ्गदत्त! बुभुक्षितोऽहम्, निःशेषिताः सर्वे मण्डूकाः, तद्दीयतां मे किञ्चिद् भोजनम्, यतोऽहं त्वयात्रानीतः। स आह—भो मित्र! न त्वयात्र विषये मय्यवस्थिते कापि चिन्ता कार्या, तद् यदि मां प्रेषयसि, ततोऽन्यकूपस्थानपि मण्डूकानाश्वास्यात्रानयामि।

स आह—मम तावत् त्वमभक्ष्यो भ्रातृस्थाने; तद् यद्येवं करोषि, तत् साम्प्रतं पितृस्थाने भवसि; तदेवं क्रियतामिति। सोऽपि तदाकर्ण्य घटिकामाश्रित्य तस्मात् कूपाद्विनिष्क्रान्तः। प्रियदर्शनोऽपि तदाकाङ्क्षया तत्रस्थः प्रतीक्षमाणस्तिष्ठति।

अथ चिरादप्यनागते गङ्गदत्ते प्रियदर्शनोऽन्यकोटरनिवासिनीं गोधामुवाच—भद्रे! क्रियतां मे स्तोकं



नीलवर्णशृगालकथा

अस्ति कस्मिंश्चिद्वनोद्देशे चण्डरवो नाम शृगालः। स कदाचित् क्षुधाविष्टो नगरान्तरे प्रविष्टः। अथ तं सारमेया विलोक्य सर्वतः शब्दायमानाः परिधाव्य तीक्ष्णदंष्ट्राग्रैर्भक्षयितुमारब्धाः, सोऽपि तैर्भक्ष्यमाणः प्राणभयात् प्रत्यासन्नं रजकगृहं प्रविष्टः। तत्र च नीलीरसपूर्णं महाभाण्डं सज्जीकृतमासीत्, तत्र स सारमेयैराक्रान्तो भाण्डमध्ये पपात। (fell)

अथ यावन्निष्क्रान्तस्तावन्नीलीवर्णः सञ्जातः, ततः सर्वे ते सारमेयास्तं शृगालमजानन्तो यथाभीष्टदिशं जग्मुः। चण्डरवोऽपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे; न च नीलवर्णेन कदाचिन्निजरङ्गस्त्यज्यते।

अथ तं हर-गल-गरल-समप्रभमपूर्वं सत्त्वमवलोक्य (creature) सर्वे ते सिंह-व्याघ्र-द्वीपि-वृकप्रभृतयोऽरण्यनिवासिनो भयव्याकुलमनसः समन्तात् पलायनक्रियां कुर्वन्ति, कथयन्ति च—अहो! अपूर्वमेतत् सत्त्वं कुतोऽप्यागतम्? न ज्ञायते कीदृगस्य चेष्टितं पौरुषं च, तद् दूरतरं गच्छामः; उक्तं च—

"न यस्य चेष्टितं विद्यात् कुलं न पराक्रमम्।
न तस्मिन् विश्वसेत् प्राज्ञो यदीच्छेच्छ्रियमात्मनः॥"

शृगालमज्ञात्वा राजानमिमं मन्यध्वे, तद्यथायं परिक्षीयते तत् कुरुत; तत्रैवमनुष्ठेयं यथा वदामि—सर्वे सन्ध्यासमये तत्सन्निधाने महारावमेकदा करिष्यथ, ततस्तं शब्दमाकर्ण्य जातिस्वभावात् तेनापि शब्दः कर्तव्यः; यतः—

"यः स्वभावो हि यस्य स्यात् तस्यासौ दुरतिक्रमः।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम्॥"

ततः शब्दादभिज्ञाय व्याघ्रेण हन्तव्यः।

अथ तथानुष्ठिते सति, स तेषां शब्दं श्रुत्वा पुलकिततनुरानन्दाश्रुपूर्णनयनस्तारस्वरेण विरोतुमारब्धः। अथ ते सिंहादयस्तं शब्दमाकर्ण्य शृगालोऽयमिति मत्वा लज्जयाधोमुखाः क्षणं स्थित्वा प्रोचुः—भोः! वञ्चिता वयमनेन क्षुद्रशृगालेन, तद्वध्यतां वध्यतामयम्। सोऽपि तदाकर्ण्य[१] पलायितुमिच्छंस्तत्र सिंहादिभिः खण्डशः कृतो मृतश्च। अतः—

'आत्मपक्षं परित्यज्य परपक्षेषु यो रतः।
स परैर्हन्यते मूढो नीलवर्णशृगालवत्॥'

धर्मबुद्धि-पापबुद्धिकथा

कस्मिंश्चिदधिष्ठाने धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः स्म। अथ कदाचित् पापबुद्धिना चिन्तितम्—अहं तावन्मूर्खो दारिद्र्योपेतश्च, तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वा अस्याश्रयेणार्थोपार्जनं कृत्वा, एनमपि वञ्चयित्वा सुखी भवामि। अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिं प्राह—भो मित्र! वार्धकभावे किमात्मचेष्टितं स्मरिष्यसि? देशान्तरमदृष्ट्वा कां शिशुजनस्य वार्तां कथयिष्यसि? उक्तं च

"विद्यां, वित्तं, शिल्पं तावन्नाप्नोति मानवः सम्यक्।
यावद्व्रजति न भूमौ देशाद्देशान्तरं हृष्टः॥"

अथ तस्य तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुजनानुज्ञातः शुभेऽहनि देशान्तरं प्रस्थितः। तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूतं वित्तमासादितम्। ततश्च तौ द्वावपि प्रभूतोपार्जितद्रव्यौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन निवृत्तौ।

अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः—भद्र! न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते, यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ति; तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्रमादाय गृहं प्रविशावः।

क्षुद्राणां संहतिः

कस्मिंश्चिद् वनोद्देशे चटकदम्पती तमालतरु-कृतनीडौ प्रतिवसतः, अथ तयोर्गच्छता कालेन सन्ततिरभवत्। अन्यस्मिन्नहनि प्रमत्तो वनगजः कश्चित् तं तमालवृक्षं घर्मार्तश्छायार्थी समाश्रितः। ततो मदोत्कर्षात् तां तस्य शाखां चटकाक्रान्तां पुष्कराग्रेणाकृष्य बभञ्ज, तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि, आयुःशेषतया च चटका कथमपि प्राणैर्न वियुक्ता। अथ सा अण्डभङ्गाभिभूता प्रलापान् कुर्वाणा न किञ्चित् सुखमाससाद।

अत्रान्तरे तस्यास्तान् प्रलापानाकर्ण्य काष्ठकूटो नाम पक्षी तस्याः परमसुहृत् तद्दुःखदुःखितोऽभ्येत्य तामुवाच—भवति! किं वृथाप्रलापेन? उक्तं च—

"नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः।
पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः॥"

चटका प्राह—अस्त्वेतत्, परं दुष्टगजेन मदान्मम सन्तानक्षयः कृतः, तद् यदि मम त्वं सुहृत् सत्यः, ततस्तस्य गजापसदस्य कोऽपि वधोपायश्चिन्त्यताम्, यस्यानुष्ठानेन मे सन्ततिनाशदुःखमपसरति। काष्ठकूट आह—भवति! सत्यमभिहितं भवत्या, तत् पश्य मे बुद्धिप्रभावम्; परं ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति, तत्तामाहूयागच्छामि, येन स दुरात्मा दुष्टगजो हन्यते।

क्षितम्—भोः! यद्येवम्, तन्ममापि स्तोकं प्रयच्छ, येन रसना-सौख्यमनुभवामि।

ततो विहस्य प्रथमवक्त्रेणाभिहितम्—आवयोर्दान-देहमुदरमेका तृप्तिश्च भवति, ततः किं पृथग्भक्षितेन? वरमनेन शेषेण प्रिया तोष्यते। एवमभिधाय तेन शेषं भारण्डयाः प्रदत्तम्। सापि तदास्वाद्य प्रहृष्टतमालिङ्गन-चाटुपरा बभूव। द्वितीयं मुखं तद्दिनादेव प्रभृति सोद्वेगं सविषादं च तिष्ठति।

अथान्येद्युर्द्वितीयमुखेन विषफलं प्राप्तम्। तद्दृष्ट्वा-परमाह—भो निर्दय! पुरुषाधम! निरपेक्ष! मया विषफलमासादितम्, तत् तवापमानात् भक्षयामि। अपरेणाभिहितम्—मूर्ख! मा मैवं कुरु, एवं कृते द्वयोरप्यावयोर्विनाशो भविष्यति, तत् क्षम्यतामपराधः। एवं वदतोऽपि तस्य तेन विषफलं भक्षितम्, किं बहुना? द्वावपि विनष्टौ।

'एकोदराः पृथग्ग्रीवा अन्योऽन्यफलभक्षिणः।
असंहता विनश्यन्ति भारुण्डा इव पक्षिणः॥'

क्षुद्राणां संहतिः

कस्मिंश्चिद् वनोद्देशे चटकदम्पती तमालतरु-कृतनीडौ प्रतिवसतः, अथ तयोर्गच्छता कालेन सन्ततिरभवत्। अन्यस्मिन्नहनि प्रमत्तो वनगजः कश्चित् तं तमालवृक्षं घर्मार्तश्छायार्थी समाश्रितः। ततो मदोत्कर्षात् तां तस्य शाखां चटकाक्रान्तां पुष्कराग्रेणाकृष्य बभञ्ज, तस्या भङ्गेन चटकाण्डानि सर्वाणि विशीर्णानि, आयुःशेषतया च चटका कथमपि प्राणैर्न वियुक्ता। अथ सा अण्डभङ्गाभिभूता प्रलापान् कुर्वाणा न किञ्चित् सुखमाससाद।

अत्रान्तरे तस्यास्तान् प्रलापानाकर्ण्य काष्ठकूटो नाम पक्षी तस्याः परमसुहृत् तद्दुःख-दुःखितोऽभ्येत्य तामुवाच—भवति! किं वृथाप्रलापेन? उक्तं च—

"नष्टं, मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः।
पण्डितानां च मूर्खाणां विशेषोऽयं यतः स्मृतः॥"

चटका प्राह—अस्त्येतत्; परं दुष्टगजेन मदान्मम सन्तानक्षयः कृतः, तद् यदि मम त्वं सुहृत् सत्यः, ततस्तस्य गजापसदस्य कोऽपि वधोपायश्चिन्त्यताम्, यस्यानुष्ठानेन मे सन्ततिनाश-दुःखमपसरति। काष्ठकूट आह—भवति! सत्यमभिहितं भवत्या, तत् पश्य मे बुद्धिप्रभावम्; परं ममापि सुहृद्भूता वीणारवा नाम मक्षिकास्ति तामाहूयागच्छामि, येन स दुरात्मा दुष्टगजो हन्यते।

अथासौ सह चटकया मक्षिकामासाद्य प्रोवाच—भद्रे ! ममेष्टेयं चटका केनचिद्दुष्टगजेन पराभूताण्डस्फोटनेन, तत्तस्य वधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि। मक्षिकाप्याह—भद्र ! किमुच्यतेऽत्र विषये ? परं ममापि मेको मेघनादो नाम मित्रं तिष्ठति, तमपि समाहूय यथोचितं कुर्मः।

अथ ते त्रयोऽपि गत्वा मेघनादस्याग्रे समस्तं वृत्तान्तं निवेद्य तस्थुः। अथ स प्रोवाच—कियन्मात्रोऽसौ वराको गजो महाजनस्य कुपितस्याग्रे ? तन्मदीयो मन्त्रः कर्तव्यः। मक्षिके ! त्वं गत्वा मध्याह्नसमये तस्य मदोद्धतस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु येन श्रवणसुखलालसो निमीलितनयनो भवति। ततश्च काष्ठकूटचञ्चुस्फोटितनयनोऽन्धीभूतस्तृषार्तो मम गर्ततटस्थितस्य सपरिवारस्य शब्दं श्रुत्वा जलाशयं मत्वाऽभ्येति ततो गर्तमासाद्य निपतिष्यति, पञ्चत्वं यास्यति चेति ; एवं समवायः कर्तव्यो यथा वैरसाधनं भवति।

अथ तथानुष्ठिते, स मत्तगजो मक्षिकागीतश्रवणसुखनिमीलितनयनः पश्चात् काष्ठकूटचञ्चुहृतचक्षुर्मध्याह्नसमये भ्रमन्, मण्डूकशब्दानुसारी गच्छन्, महागर्तकुण्डे पतित्वा मृतः।

हरिदत्त-क्षेत्रपालसर्पकथा

अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः, तस्य च कृषिं कुर्वतः सदैव निष्फलः कालोऽतिवर्त्तते। अथैकस्मिन् दिवसे स ब्राह्मण उष्णकालावसाने घर्मार्त्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तोऽनतिदूरे वल्मीकोपरि प्रसारितं बृहत्फटायुक्तं भीषणं भुजङ्गं दृष्ट्वा चिन्तयामास—नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता, तेनेदं मे कृषिकर्म विफलीभवति; तदस्या अहं पूजामद्य करिष्यामि। इत्यवधार्य कुतोऽपि क्षीरं याचित्वा शरावे निक्षिप्य वल्मीकान्तिकमुपागम्योवाच—भोः क्षेत्रपाल, मयैतावन्तं कालं न ज्ञातं यत्त्वमत्र वससि, तेन पूजा न कृता, तत् साम्प्रतं क्षमस्व इति। एवमुक्त्वा दुग्धं च निवेद्य गृहाभिमुखं प्रायात्।

अथ प्रातर्यावदागत्य पश्यति तावद्दीनारमेकं शरावे दृष्टवान्। एवं च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति, एकैकं च दीनारं गृह्णाति।

अथैकस्मिन् दिवसे वल्मीके क्षीरनयनाय पुत्रं निरूप्य ब्राह्मणो ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दीनारमेकं च दृष्ट्वा गृहीत्वा च चिन्तितवान्—नूनं सुवर्णदीनारपूर्णोऽयं वल्मीकः। तदेनं हत्वा

अथासौ सह चटकया मक्षिकामासाद्य प्रोवाच - भद्रे! ममेष्टा चटका केनचिद्दुष्टगजेन पराभूताण्डस्फोटनेन, तत्तस्य वधोपायमनुतिष्ठतो मे साहाय्यं कर्तुमर्हसि। मक्षिकाप्याह - भद्र! किमुच्यतेऽत्र विषये? पर ममापि भेको मेघनादो नाम मित्रं तिष्ठति, तमपि समाहूय यथोचितं कुर्मः।

अथ ते त्रयोऽपि गत्वा मेघनादस्याग्रे समस्तं वृत्तान्तं निवेद्य तस्थुः। अथ स प्रोवाच—कियन्मात्रोऽसौ वराको गजो महाजनस्य कुपितस्याग्रे? तन्मदीयो मन्त्रः कर्तव्यः। मक्षिके! त्वं गत्वा मध्याह्नसमये तस्य मदोत्कटस्य गजस्य कर्णे वीणारवसदृशं शब्दं कुरु, येन श्रवणसुखलालसो निमीलितनयनो भवति, ततश्च काष्ठकूटचञ्च्वा स्फोटितनयनोऽन्धीभूतस्तृषार्तो मम गर्त-तटाश्रितस्य सपरिकरस्य शब्दं श्रुत्वा जलाशयं मत्वा-ऽभ्येति ततो गर्तमासाद्य पतिष्यति पञ्चत्वं यास्यति चेति, एवं समवाय कर्तव्यो यथा वैरसाधनं भवति।

अथ तथानुष्ठिते, स मत्तगजो मक्षिका गीतश्रवण-सुखान्निमीलितनयनः पश्चात् काष्ठकूट-हृतचक्षुर्मध्याह्न-समये भ्राम्यन्, मण्डूकशब्दानुसारी गच्छन्, महागर्त-मासाद्य पतितो मृतश्च।

हरिदत्त-क्षेत्रपालसर्पकथा

अस्ति कस्मिंश्चिदधिष्ठाने हरिदत्तो नाम ब्राह्मणः, तस्य च कृषिं कुर्वतः सदैव निष्फलः कालोऽतिवर्त्तते। अथैकस्मिन् दिवसे स ब्राह्मण उष्णकालावसाने धर्मार्त्तः स्वक्षेत्रमध्ये वृक्षच्छायायां प्रसुप्तोऽनतिदूरे वल्मीकोपरि प्रसारितं बृहत्फटाटोपं भीषणं भुजङ्गं दृष्ट्वा चिन्तयामास—नूनमेषा क्षेत्रदेवता मया कदाचिदपि न पूजिता, तेनेदं मे कृषिकर्म विफलीभवति; तदस्या अहं पूजामद्य करिष्यामि। इत्यवधार्य्य कुतोऽपि क्षीरं याचित्वा शरावे निक्षिप्य वल्मीकान्तिकमुपागम्योवाच—भोः क्षेत्रपाल, मयैतावन्तं कालं न ज्ञातं यत्त्वमत्र वससि, तेन पूजा न कृता; तत् साम्प्रतं क्षमस्व इति। एवमुक्त्वा दुग्धं च निवेद्य गृहाभिमुखं प्रायात्।

अथ प्रातर्यावदागत्य पश्यति तावद्दीनारमेकं शरावे दृष्टवान्। एवं च प्रतिदिनमेकाकी समागत्य तस्मै क्षीरं ददाति, एकैकं च दीनारं गृह्णाति।

अथैकस्मिन् दिवसे वल्मीके क्षीरनयनाय पुत्रं निरूप्य ब्राह्मणो ग्रामान्तरं जगाम। पुत्रोऽपि क्षीरं तत्र नीत्वा संस्थाप्य च पुनर्गृहं समायातः। दिनान्तरे तत्र गत्वा दीनारमेकं च दृष्ट्वा गृहीत्वा च चिन्तितवान्—नूनं सुवर्णदीनारपूर्णोऽयं वल्मीकः। तदेनं

सर्वमेकवारं ग्रहीष्यामि। इत्येवं मन्त्रयाणान्वेषु: चौरं ददता ब्राह्मणपुत्रेण मर्पो लगुडेन शिरसि ताडितः।

ततः कथमपि दैववशादमुक्तजीवित एव रोषात्समेव तीव्रविषदशनैस्तथादशत् यथा सद्यः पञ्चत्वमुपागतः, स्वजनैश्च नातिदूरे चैतस्य काष्ठसञ्चयैः संस्कृतः।

अथ द्वितीयदिने तस्य पिता समायातः, स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा तथैव समर्थितवान्। अब्रवीच्च—

भूतान् यो नानुगृह्णाति ह्यात्मनः शरणागतान्।
भूतार्थास्तस्य नश्यन्ति हंसाः पद्मवने यथा॥

पुरुषैरुक्तम्—कथमेतत्? ब्राह्मणः कथयति—

'अस्ति कस्मिंश्चिदधिष्ठाने चित्ररथो नाम राजा। तस्य योधैः सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति, तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति, षण्मासे षण्मासे पिच्छमेकैकं परित्यजन्ति।

अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः। तैश्चोक्तः—अस्माकं मध्ये त्वया न वस्तव्यम्, येन कारणेनास्माभिः षण्मासान्ते पिच्छैकैकदानं कृत्वा गृहीत-मेतत् सरः। एवं च किं बहुना परस्परं द्वैधमुत्पन्नम्। स च राज्ञः शरणं गतोऽब्रवीत्—देव, एते पक्षिण एवं वदन्ति यदस्माकं राजा किं करिष्यति? न कस्याप्यावासं ; मया चोक्तम्—न शोभनं युष्माभिरभिहितम्,

अहं गत्वा राज्ञे निवेदयिष्यामि। एवं स्थिते देवः प्रमाणम्।

ततो राजा भृत्यानब्रवीत्—भो भोः गच्छत, सर्वान् पथिको गलाद्धूं कृत्वा शीघ्रमानयत। राजादेशानन्तरमेव प्रचेलुस्ते। अथ लगुडहस्तान् राजपुरुषान् दृष्ट्वा तत्रैकेन पथिका हृदेनोक्तम्—भोः स्वजनाः, न शोभनमापतितम्। ततः सर्वैरेकमतीभूय शीघ्रमुत्पतितव्यम्। तैश्च तथानुष्ठितम्। अतोऽहं ब्रवीमि—भूतान् यो नानुगृह्णाति इति।'

इत्युक्त्वा पुनरपि ब्राह्मणः प्रत्यूषे क्षीरं गृहीत्वा तत्र गत्वा तारस्वरेण सर्पमस्तौत्। तदा सर्पश्चिरं वल्मीकद्वारान्तर्लीन एव ब्राह्मणं प्रत्युवाच—त्वं लोभादत्रागतः पुत्रशोकमपि विहाय। अतः परं तव मम च प्रीतिर्नोचिता। तव पुत्रेण यौवनोन्मादेनाहं ताडितः, मया स दष्टः। कथं मया लगुडप्रहारो विस्मर्तव्यः, त्वया च पुत्रशोकदुःखं कथं विस्मर्तव्यम्? इत्युक्त्वा बहुमूल्यं हीरकमणिं तस्मै दत्त्वा—अतःपरं पुनस्त्वया नागन्तव्यम् इति पुनरुक्त्वा विवरान्तर्गतः। ब्राह्मणश्च मणिं गृहीत्वा पुत्रबुद्धिं निन्दन् स्वगृहमागतः।

अत उच्यते—

'चितिका दीपिता पश्य फटा भग्ना ममैव च।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्धते॥'

सर्वमेतद्भारं वक्ष्यामि। इत्येवं सम्प्रधार्यमाणेषु घोरं ददता ब्राह्मणपुत्रेण सर्पो लगुडेन शिरसि ताडितः।

ततः कथमपि दष्टमात्रमुक्तजीवित एव रोगार्त्तमिव तीव्रविषदशनेस्तथादगत् यथा सद्यः पञ्चत्वमुपागतः, स्वजनेन नातिदूरे तस्य काष्ठसञ्चयैः संस्कृतः।

अथ द्वितीयदिने तस्य पिता समायातः, स्वजनेभ्यः पुत्रविनाशकारणं श्रुत्वा तथैव समर्थितवान्। अत्रोक्तञ्च—

भूतान् यो नानुगृह्णाति ह्यात्मनः शरणागतान्।
भूतार्थास्तस्य नश्यन्ति हंसाः पद्मवने यथा॥

पुत्रैरुक्तम्—कथमेतत्? ब्राह्मणः कथयति—

अस्ति अस्मिन्विदर्भविषये चित्ररथो नाम राजा। तस्य ग्रामे, सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति, तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति, षण्मासे षण्मासे पिच्छमेकैकं परित्यजन्ति।

अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः। हंसैरुक्त—अस्माकं मध्ये त्वया न वस्तव्यम्, येन कारणेनास्माभिः षण्मासान्ते पिच्छैकैकदानं कृत्वा गृहीतमिदम् सरः। एवं च किं बहुना परस्परं द्वैधमुत्पन्नम्। स च राज्ञः शरणं गतोऽब्रवीत्—देव, एते पक्षिण एवं वदन्ति यदस्माकं राजा किं करिष्यति? न कस्याप्यावासं दद्मः। मया चोक्तम्—न शोभनं युष्माभिरभिहितम्,

ऽहं गत्वा राज्ञे निवेदयिष्यामि। एवं स्थिते देवः प्रमाणम्।

ततो राजा भृत्यानब्रवीत्—भो भोः गच्छत, सर्वान् पक्षिणो गतासून् कृत्वा शीघ्रमानयत। राजादेशानन्तरमेव प्रचेलुस्ते। अथ लगुडहस्तान् राजपुरुषान् दृष्ट्वा तत्रैकेन पक्षिणा वृद्धेनोक्तम्—भोः स्वजनाः, न शोभनमापतितम्। ततः सर्वैरेकमतीभूय शीघ्रमुत्पतितव्यम्। तैश्च तथानुष्ठितम्। अतोऽहं ब्रवीमि—भूतान् यो नानुगृह्णाति इति।'

इत्युक्त्वा पुनरपि ब्राह्मणः प्रत्यूषे क्षीरं गृहीत्वा तत्र गत्वा तारस्वरेण सर्पमस्तौत्। तदा सर्पश्चिरं वल्मीकद्वारान्तर्लीन एव ब्राह्मणं प्रत्युवाच—त्वं लोभादत्रागतः पुत्रशोकमपि विहाय। अतः परं तव मम च प्रीतिर्नोचिता। तव पुत्रेण यौवनोन्मादेनाहं ताडितः, मया स दष्टः। कथं मया लगुडप्रहारो विस्मर्तव्यः, त्वया च पुत्रशोकदुःखं कथं विस्मर्तव्यम्? इत्युक्त्वा बहुमूल्यं हीरकमणिं तस्मै दत्त्वा—अतःपरं पुनस्त्वया नागन्तव्यम् इति पुनरुक्त्वा विवरान्तर्गतः। ब्राह्मणश्च मणिं गृहीत्वा पुत्रबुद्धिं निन्दन् स्वगृहमागतः।

अत उच्यते—

'चितिका दीपिता पश्य फटा भग्ना ममैव च।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्द्धते॥'

सर्वमेकवारं ग्रहीष्यामि। इत्येवं मन्मधार्यान्वितः चौरं दटता ब्राह्मणपुत्रेण मर्मा लगुडेन शिरसि ताडितः।

ततः कथमपि दववशादमुक्तजीवित एव रोषात्तमेव तीव्रविपदर्शनैस्तथादशत् यथा सद्यः पञ्चत्वमुपागतः, स्वजनैश्च नातिदूरे चैत्रस्य काष्ठसञ्चयैः संस्कृतः।

अथ द्वितीयदिने तस्य पिता समायातः, स्वजनेभ्यः सुतविनाशकारणं श्रुत्वा तथैव समर्थितवान्। अब्रवीच्च—

भूतान् यो नानुगृह्णाति ह्यात्मनः शरणागतान्।
भूतार्थास्तस्य नश्यन्ति हंसाः पद्मवने यथा॥

पुरुषैरुक्तम्—कथमेतत्? ब्राह्मणः कथयति—

'अस्ति कस्मिंश्चिदधिष्ठाने चित्ररथो नाम राजा। तस्य योधैः सुरक्ष्यमाणं पद्मसरो नाम सरस्तिष्ठति, तत्र च प्रभूता जाम्बूनदमया हंसास्तिष्ठन्ति, षण्मासे षण्मासे पिच्छमेकैकं परित्यजन्ति।

अथ तत्र सरसि सौवर्णो बृहत्पक्षी समायातः। तैरुक्तः—अस्माकं मध्ये त्वया न वस्तव्यम्, येन कारणेनास्माभिः षण्मासान्ते पिच्छैकैकदानं कृत्वा गृहीत-मेतत् सरः। एवं च किं बहुना परस्परं द्वैधमुत्पन्नम्। स च राज्ञः शरणं गतोऽब्रवीत्—देव, एते पक्षिण एवं वदन्ति यदस्माकं राजा किं करिष्यति? न कस्याप्यावासं दद्मः; मया चोक्तम्—न शोभनं युष्माभिरभिहितम्,

अहं गत्वा राज्ञे निवेदयिष्यामि। एवं स्थिते देवः प्रमाणम्।

ततो राजा भृत्यानब्रवीत्—भो भोः गच्छत, सर्वान् पक्षिणो गतासून् कृत्वा शीघ्रमानयत। राजादेशानन्तरमेव प्रचेलुस्ते। अथ लगुडहस्तान् राजपुरुषान् दृष्ट्वा तत्रैकेन पक्षिणा वृद्धेनोक्तम्—भोः स्वजनाः, न शोभनमापतितम्। ततः सर्वैरेकमतीभूय शीघ्रमुत्पतितव्यम्। तैश्च तथानुष्ठितम्। अतोऽहं ब्रवीमि—भूतान् यो नानुगृह्णाति इति।'

इत्युक्त्वा पुनरपि ब्राह्मणः प्रत्यूषे क्षीरं गृहीत्वा तत्र गत्वा तारस्वरेण सर्पमस्तौत्। तदा सर्पश्चिरं वल्मीकद्वारान्तर्लीन एव ब्राह्मणं प्रत्युवाच—त्वं लोभादत्रागतः पुत्रशोकमपि विहाय। अतः परं तव मम च प्रीतिर्नोचिता। तव पुत्रेण यौवनोन्मादेनाहं ताडितः, मया स दष्टः। कथं मया लगुडप्रहारो विस्मर्तव्यः, त्वया च पुत्रशोकदुः ' कथं विस्मर्तव्यम्? इत्युक्त्वा बहुमूल्यं हीरकमणिं तस्मै दत्त्वा—अतःपरं पुनस्त्वया नागन्तव्यम् इति पुनरुक्त्वा विवरान्तर्गतः। ब्राह्मणश्च मणिं गृहीत्वा पुत्रबुद्धिं निन्दन् स्वगृहमागतः।

अत उच्यते—

'चितिकां दीपितां पश्य फटां भग्नां ममैव च।
भिन्नश्लिष्टा तु या प्रीतिर्न सा स्नेहेन वर्धते॥'

सुवर्णपुरीषपक्षिकथा

अस्ति कस्मिंश्चित् पर्वतप्रदेशे महान् वृक्षः। तत्र च सिन्धुकनामा कोऽपि पक्षी प्रतिवसति स्म, तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित्तमुद्दिश्य व्याधः कोऽपि समाययौ। स च पक्षी तदग्रत एव पुरीषमुत्ससर्ज। अथ पातसमकालमेव तत् सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत्—अहो, मम शिशुकालादारभ्य शकुनिबन्धव्यसनिनोऽशीतिवर्षाणि समभूवन्। न च कदाचिदपि पक्षिपुरीषे सुवर्णं दृष्टम्। इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध।

अथासावपि पक्षी मूर्खस्तत्रैव विश्वस्तचित्तो यथापूर्वमुपविष्टः तत्कालमेव पाशेन बद्धः। व्याधस्तु तं पाशादुन्मुच्य पञ्जरके संस्थाप्य निजावासं नीतवान्। अथ चिन्तयामास—किमनेन सापायेन पक्षिणाहं करिष्यामि? यदि कदाचित् कोऽप्यमुमीदृशं ज्ञात्वा राज्ञे निवेदयिष्यति तन्नूनं प्राणसंशयो मे भवेत्; अतः स्वयमेव पक्षिणं राज्ञे निवेदयामि। इति विचार्य तथैवानुष्ठितवान्।

अथ राजापि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमलः परां तुष्टिमुपागतः। प्राह चैवम्—हंहो रक्षापुरुषाः, एनं पक्षिणं यत्नेन रक्षत; अशनपानादिकं चास्य यथेच्छं प्रयच्छत।

अथ मन्त्रिणाभिहितम्—किमनेनाश्रद्धेयव्याधवचनप्रत्ययमात्रपरिगृहीतेनाण्डजेन ? किं कदाचित् पक्षिपुरीषे सुवर्णं सम्भवति ? तन्मुच्यतां पञ्जरबन्धनादयं पक्षी । इति मन्त्रिवचनाद् राज्ञा मोचितोऽसौ पक्ष्युन्नतद्वारतोरणे समुपविश्य सुवर्णमयीं विष्ठां विधाय

पूर्वं तावदहं मूर्खो, द्वितीयः पाशबन्धकः ।
ततो राजा च मन्त्री च, सर्वं वै मूर्खमण्डलम् ॥

इति श्लोकं पठित्वा यथासुखमाकाशमार्गेण प्रायात् ।

अतिलोभि-ब्राह्मणपुत्राणां परिणामः

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गता वसन्ति स्म । ते चापि दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः—अहो, धिगियं दरिद्रता ! उक्तं च—

"वरं वनं व्याघ्रगजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥"

सुवर्णमयपुरीषपक्षिकथा

अस्ति कस्मिंश्चित् पर्वतैकदेशे महान् वृक्षः। तत्र च सिन्धुकनामा कोऽपि पक्षी प्रतिवसति स्म, तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित्तमुद्दिश्य व्याधः कोऽपि समाययौ। स च पक्षी तदग्रत एव पुरीषमुत्ससर्ज। अथ पातसमकालमेव तत् सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत्—अहो, मम शिशुकालादारभ्य शकुनिबन्धव्यसनिनोऽशीतिवर्षाणि समभूवन्। न च कदाचिदपि पक्षिपुरीषे सुवर्णं दृष्टम्। इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध।

अथासावपि पक्षी मूर्खस्तत्रैव विश्वस्तचित्तो यथापूर्वमुपविष्टः तत्कालमेव पाशेन बद्धः। व्याधस्तु तं पाशादुन्मुच्य पञ्जरके संस्थाप्य निजावासं नीतवान्। अथ चिन्तयामास—किमनेन सापायेन पक्षिणाहं करिष्यामि? यदि कदाचित् कोऽप्यमुमीदृशं ज्ञात्वा राज्ञे निवेदयिष्यति तन्नूनं प्राणसंशयो मे भवेत्; अतः स्वयमेव पक्षिणं राज्ञे निवेदयामि। इति विचार्य तथैवानुष्ठितवान्।

अथ राजापि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमलः परां तुष्टिमुपागतः। प्राह चैवम्—अहो रक्षापुरुषाः, एनं पक्षिणं यत्नेन रक्षत; अशनपानादिकं चास्य यथेच्छं प्रयच्छत।

अथ मन्त्रिणाभिहितम्—किमनेनाप्रत्ययमात्रपरिगृहीतेनाण्डजेन ? किं कदाचित् पक्षिपुरीषं सुवर्णं सम्भवति ? तन्मुच्यतां पञ्जरबन्धनादयं पक्षी। इति मन्त्रिवचनाद् राज्ञा मोचितोऽसौ पक्षी उन्नतद्वारतोरणे समुपविश्य सुवर्णमयीं विष्ठां विधाय

पूर्वं तावदहं मूर्खो, द्वितीयः पाशबन्धकः।
ततो राजा च मन्त्री च, सर्वं वै मूर्खमण्डलम्॥

इति श्लोकं पठित्वा यथासुखमाकाशमार्गेण प्रायात्।

अतिलोभि-ब्राह्मणपुत्राणां परिणामः

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गता वसन्ति स्म। ते चापि दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः—अहो, धिगियं दरिद्रता। उक्तं च—

"वरं वनं व्याघ्रगजादिसेवितं
जनेन हीनं बहुकण्टकावृतम्।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम्॥"

तथा च—

"शूरः सुरूपः सुभगश्च वाग्मी
शस्त्राणि शास्त्राणि विदाङ्करोति।
अर्थं विना नैव यशश्च मानं
प्राप्नोति मर्त्योऽत्र मनुष्यलोके॥

तानीन्द्रियाण्यविकलानि, तदेव नाम
सा बुद्धिरप्रतिहता, वचनं तदेव।
अर्थोष्मणा विरहितः पुरुषः स एव
बाह्यः [illegible] भवतीति विचित्रमेतत्॥"

आत्मपोषितविधिना सम्भाष्य तेनैव सह तस्य मठं जग्मुः।

अथ तेन ते पृष्टाः—कुतो भवन्तः समायाताः? क्व यास्यथ? किं प्रयोजनम्? ततस्तैरभिहितम्—वयं सिद्धियात्रिकाः, तत्र यास्यामो यत्र धनाप्तिर्मृत्युर्वा भविष्यतीत्येष निश्चयः। उक्तं च—

दुष्प्राप्याणि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि।
अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम्॥

तत् कथ्यतामस्माकं कश्चिद्धनोपायो विवरप्रवेश-शाकिनीसाधन-श्मशानसेवन-महामांसविक्रय-साधकवर्त्ति-प्रभृतीनामेकतम इति। अद्भुतशक्तिर्भवान् श्रूयते, वयमप्यतिसाहसिकाः।

उक्तं च—

"महान्त एव महतामर्थं साधयितुं क्षमाः।
ऋते समुद्रादन्यः को बिभर्ति वडवानलम्॥"

भैरवानन्दोऽपि तेषां सिद्ध्यर्थं बहूपायं सिद्धवर्त्ति-चतुष्टयं कृत्वार्पयत्, आह च—गम्यतां हिमालयदिशि; तत्र संप्राप्तानां यत्र वर्त्तिः पतिष्यति, तत्र निधानमसन्दिग्धं प्राप्स्यथ। तत्र स्थानं खनित्वा निधिं गृहीत्वा व्याघुट्यताम्।

तथा च—

"शूरः सुरूपः सुभगश्च वाग्मी
शस्त्राणि शास्त्राणि विदाङ्करोति ।
अर्थं विना नैव यशश्च मानं
प्राप्नोति मर्त्योऽत्र मनुष्यलोके ॥

तानीन्द्रियाण्यविकलानि, तदेव नाम
सा बुद्धिरप्रतिहता, वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
बाह्यः क्षणेन भवतीति विचित्रमेतत् ॥"

तद् गच्छामः कुत्रचिदर्थाय । इति समन्त्र्य स्वदेशं पुरं च स्वसुहृत्सहितं बान्धवयुतं गृहं च परित्यज्य प्रस्थिताः । अथवा साध्विदमुच्यते—

"सत्यं परित्यजति, मुञ्चति बन्धुवर्गं,
शीघ्रं विहाय जननीमपि जन्मभूमिम् ।
संत्यज्य गच्छति विदेशमभीष्टलोकं
चिन्ताकुलीकृतमतिः पुरुषोऽत्र लोके ॥"

एवं क्रमेण गच्छन्तोऽवन्तीं प्राप्ताः । तत्र सिप्राजले महाकालं प्रणम्य यावन्निर्गच्छन्ति तावद् नाम योगी सम्मुखो बभूव । ततस्तं

ब्राह्मणोचितविधिना सम्भाष्य तेनैव सह तस्य
जग्मुः ।

अथ तेन ते पृष्टाः—कुतो भवन्तः समायाताः
क्व यास्यथ ? किं प्रयोजनम् ? ततस्तैरभिहितम्—
वयं सिद्धियात्रिकाः, तत्र यास्यामो यत्र धनाप्तिर्मृत्युर्वा
भविष्यतीत्येष निश्चयः । उक्तं च—

दुष्प्राप्याणि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि ।
अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम् ॥

तत् कथ्यतामस्माकं कश्चिद्धनोपायो विवरप्रवेश-शाकिनीसाधन-श्मशानसेवन-महामांसविक्रय-साधकवर्ति-प्रभृतीनामेकतम इति । अद्भुतशक्तिर्भवान् श्रूयते, वयमप्यतिसाहसिकाः । उक्तं च—

"महान्त एव महतामर्थं साधयितुं क्षमाः ।
ऋते समुद्रादन्यः को बिभर्ति वडवानलम् ।"

भैरवानन्दोऽपि तेषां सिद्ध्यर्थं बहूपायं सिद्धवर्ति-चतुष्टयं कृत्वार्पयत्, आह च—गम्यतां हिमालयदिशि ; तत्र संप्राप्तानां यत्र वर्तिः पतिष्यति, तत्र निधानमसन्दिग्धं प्राप्स्यथ । तत्र स्थानं खनित्वा निधिं गृहीत्वा व्याघुष्यताम् ।

अतःपरं रत्नानि भविष्यन्ति, येषामेकतमेनापि दारिद्र्यनाशो भवति; तदुत्तिष्ठ, अग्रे गच्छावः; किमनेन भारभूतेनापि प्रभूतेन? स आह—गच्छतु भवान्, अहमत्र स्थितस्त्वां प्रतिपालयिष्यामि।

तथानुष्ठिते सोऽपि गच्छन्नेकाकी ग्रीष्मार्कप्रतापसन्तप्ततनुः पिपासाकुलितः सिद्धिमार्गच्युत इतस्ततश्च बभ्राम। अथ भ्राम्यन् स्थलोपरि पुरुषमेकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकमपश्यत्। ततो द्रुततरं गत्वा तमवोचत्—भोः, को भवान्? किमेवं चक्रेण भ्रमता शिरसि तिष्ठसि? तत् कथय मे यदि कुत्रचिज्जलमस्ति।

एवं तस्य प्रवदतस्तच्चक्रं तत्क्षणात्तस्य शिरसो ब्राह्मणमस्तके चटितम्। स आह—भद्र, किमेतत्? स आह—ममाप्येवमेवैतच्छिरसि चटितम्। स आह—तत् कथय कदैतदुत्तरिष्यति, महती मे वेदना वर्त्तते। स आह—यदि त्वमिव कश्चिद्धृतसिद्धिवर्त्तिरेवमागत्य त्वामालापयिष्यति तदा तस्य मस्तके चटिष्यति।

स आह—कियान् कालस्तवैवं स्थितस्य? स आह—साम्प्रतं को राजा धरणीतले? स आह—वीणावत्सराजः। स आह—अहं तावत् कालसंख्यां न जानामि। परं यदा रामो राजासीत्तदाहं दारिद्र्योपहतः सिद्धिवर्त्तिमादायानेन पथा समायातः। ततो मयान्यो नरो मस्तकधृतचक्रो दृष्टः, पृष्टश्च। ततश्चैतज्जातम्।

तथानुष्ठिते तेषां गच्छतामेकतमस्य हस्ताद्वर्त्तिर्निपपात। अथासौ यावत्तं प्रदेशं खनति तावत्ताम्रमयी भूमिः। ततस्तेनाभिहितम्—अहो, गृह्यतां स्वेच्छया ताम्रम्। अन्ये प्रोचुः—भो मूढ, किमनेन क्रियते? यत् प्रभूतमपि दारिद्र्यं न नाशयति। तदुत्तिष्ठ, अग्रतो गच्छामः। सोऽब्रवीत्—यान्तु भवन्तः, नाहमग्रे यास्यामि। एवमभिधाय ताम्रं यथेच्छया गृहीत्वा प्रथमो निवृत्तः। ते त्रयोऽप्यग्रे प्रस्थिताः।

अथ किञ्चिन्मात्रं गतस्याग्रेसरस्य वर्त्तिर्निपपात। सोऽपि यावत् खनितुमारब्धस्तावद्रूप्यमयी क्षितिः। ततः प्रहर्षितः प्राह—भो भोः, गृह्यतां यथेच्छया रूप्यम्; नाग्रे गन्तव्यम्।

तावूचतुः—भोः, पृष्ठतस्ताम्रमयी भूमिः, अग्रतो रूप्यमयी। तन्नूनमग्रे सुवर्णमयी भविष्यति, तदनेन प्रभूतेनापि दारिद्र्यनाशो न भवति; तदावामग्रे यास्यावः। एवमुक्त्वा द्वावप्यग्रे प्रस्थितौ। सोऽपि स्वशक्त्या रूप्यमादाय निवृत्तः।

तयोरपि गच्छतोरेकस्याग्रे वर्त्तिः पपात। सोऽपि प्रहृष्टो यावत् खनति तावत् सुवर्णभूमिं दृष्ट्वा द्वितीयं प्राह—भोः, गृह्यतां स्वेच्छया सुवर्णम्, सुवर्णादन्यन्न किञ्चिदुत्तमं भविष्यति। स प्राह—मूढ, न किञ्चिद् वेत्सि; प्राक् ताम्रम्, ततो रूप्यम्, ततः सुवर्णम्, तन्नून-

मतःपरं रत्नानि भविष्यन्ति, येषामेकतमेनापि दारिद्र्यनाशो भवति ; तदुत्तिष्ठ, अग्रे गच्छावः ; किमनेन भार-भूतेनापि प्रभूतेन ? स आह—गच्छतु भवान्, अहमत्र स्थितस्त्वां प्रतिपालयिष्यामि।

तथानुष्ठिते सोऽपि गच्छन्नेकाकी ग्रीष्मार्कप्रतापसन्तप्ततनुः पिपासाकुलितः सिद्धिमार्गच्युत इतस्ततश्च बभ्राम। अथ भ्राम्यन् स्थलोपरि पुरुषमेकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकमपश्यत्। ततो द्रुततरं गत्वा तमवोचत्—भोः, को भवान् ? किमेवं चक्रेण भ्रमता शिरसि तिष्ठसि ? तत् कथय मे यदि कुत्रचिज्जलमस्ति।

एवं तस्य प्रवदतस्तच्चक्रं तत्क्षणात्तस्य शिरसो ब्राह्मणमस्तके चटितम्। स आह—भद्र, किमेतत् ? स आह—ममाप्येवमेवैतच्छिरसि चटितम्। स आह—तत् कथय कदैतदुत्तरिष्यति, महती मे वेदना वर्त्तते। स आह—यदि त्वमिव कश्चिद्धृतसिद्धिवर्तिरेवमागत्य त्वामालापयिष्यति तदा तस्य मस्तके चटिष्यति।

स आह—कियान् कालस्तवैवं स्थितस्य ? स आह—साम्प्रतं को राजा धरणीतले ? स आह—वीणावत्सराजः। स आह—अहं तावत् कालसंख्यां न जानामि। परं यदा रामो राजासीत्तदाहं दारिद्र्योपहतः सिद्धिवर्त्तिमादायानेन पथा समायातः। ततो मयान्यो नरो मस्तकधृतचक्रो दृष्टः, पृष्टश्च। ततश्चैतज्जातम्।

स आह—भद्र, कथं तवैव स्थितस्य भोजनजलप्राप्तिरासीत्। स आह—भद्र, धनदेन निधानहरणभयात् सिद्धानामेतद्भयं दर्शितम्, तेन कश्चिदपि नागच्छति, यदि कश्चिदायाति स क्षुत्पिपासानिद्रारहितो जरामरणवर्जितः केवलमेवं वेदनामनुभवतीति। तदापृच्छ्य मां स्वगृहाय। इत्युक्त्वा गतः।

अथ तस्मिंश्चिरयति स सुवर्णसिद्धिस्तस्यान्वेषणपरस्तत्पदपङ्क्त्या यावत् किञ्चिद्वनान्तरमागच्छति तावद्रुधिरप्लावितशरीरस्तीक्ष्णचक्रेण मस्तके भ्रमता सवेदनः क्वणन्नुपविष्टस्तिष्ठति। ततस्तमभ्यवर्तिना भूत्वा सबाष्पं पृष्टः—भद्र, किमेतत्? स आह—विधिनियोगः। स आह—कथं तत्? कथय कारणमस्य।

सोऽपि तेन पृष्टः सर्वं चक्रवृत्तान्तमकथयत्। तत् श्रुत्वासौ तं विगर्हयन्निदमाह—भोः, निषिद्धस्त्वं मया बहुशो न शृणोषि मे वाक्यम्। तत् किं क्रियते? विद्यावानपि कुलीनोऽपि बुद्धिरहितः। अथवा साध्विदमुच्यते—

'अतिलोभो न कर्तव्यो लोभं नैव परित्यजेत्।
अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके॥'



असम्भाव्यचिन्तापरिणामः

कस्मिंश्चिन्नगरे कश्चित् स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म। तेन भिक्षार्जितैः सक्तुभिर्भुक्तशेषैः कलशः सम्पूरितः। तं च घटं नागदन्तेऽवलम्ब्य तस्याधस्तात् खट्वां निधाय सततमेकदृष्ट्या तमवलोकयति।

अथ कदाचिद्रात्रौ सुप्तश्चिन्तयामास यत्—परिपूर्णोऽयं घटस्तावत् सक्तुभिर्वर्तते। तद् यदि दुर्भिक्षं भवति तदनेन रूपकाणां शतमुत्पद्यते। ततस्तेन मयाजाद्वयं ग्रहीतव्यम्। ततः षाण्मासिकप्रसववशात्ताभ्यां यूथं भविष्यति। ततोऽजाभिः प्रभूता गा ग्रहीष्यामि, गोभिर्महिषीः, महिषीभिर्वडवाः। वडवाप्रसवतः प्रभूता अश्वा भविष्यन्ति, तेषां विक्रयात् प्रभूतं सुवर्णं भविष्यति। सुवर्णेन चतुःशालं गृहं सम्पद्यते। ततः कश्चिद्ब्राह्मणो मम गृहमागत्य प्राप्तवयस्कां रूपाढ्यां कन्यां दास्यति, तत्सकाशात् पुत्रो मे भविष्यति। तस्याहं सोमशर्मेति नाम करिष्यामि। ततस्तस्मिन् जानुचलनयोग्ये सञ्जातेऽहं पुस्तकं गृहीत्वाश्वशालायाः पृष्ठदेश उपविष्टस्तदवधारयिष्यामि। अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गाज्जानुप्रचलनपरोऽश्वखुरासन्नवर्ती मत्समीपमागमिष्यति। ततोऽहं ब्राह्मणीं कोपाविष्टोऽभिधास्यामि

—गृहाण तावद् बालकम्। सापि गृहकर्मव्यग्रतयास्मद्वचनं न श्रोष्यति। ततोऽहं समुत्थाय तां पादप्रहारेण ताडयिष्यामि।

एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तो यथा स घटो भग्नः सक्तुभिः पाण्डुरतां गतः। अतः साधूच्यते—

'अनागतवतीं चिन्तामसंभाव्यां करोति यः।
स एव पाण्डुरः शेते सोमशर्मपिता यथा॥'

चन्द्रभूपतिकथा

कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्रा वानरक्रीडारता वानरयूथं नित्यमेवानेकभोजनभक्ष्यादिभिः पुष्टिं नयन्ति स्म। अथ वानरयूथाधिपो यः स औशनस-बार्हस्पत्य-चाणक्यमतवित् तदनुष्ठाता च तान् सर्वानप्यध्यापयति स्म।

अथ तस्मिन् राजगृहे लघुकुमारवाहनयोग्यं मेषयूथमस्ति। तन्मध्यादेको जिह्वालौल्यादहर्निशं निःशङ्कं महानसे प्रविश्य यत् पश्यति तत् सर्वं भक्षयति। ते च सूपकारा यत् किंचित् काष्ठं मृण्मयं भाजनं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति तेनाशु ताडयन्ति।

सोऽपि वानरयूथपस्तद्दृष्ट्वा व्यचिन्तयत्—अहो, मेषसूपकारकलहोऽयं वानराणां क्षयाय भविष्यति, यतोऽन्नास्वादलम्पटोऽयं मेषो महाकोपाश्च सूपकारा यथासन्नवस्तुना प्रहरन्ति, तद् यदि वस्तुनोऽभावात् कदाचिदुल्मुकेन ताडयिष्यन्ति तदोर्णाप्रचुरोऽयं मेषः स्वल्पेनापि वह्निना प्रज्वलिष्यति। तद्दह्यमानः पुनरश्वकुट्यां समीपवर्तिन्यां प्रवेक्ष्यति, सापि तृणप्राचुर्याज्ज्वलिष्यति, ततोऽश्वा वह्निदाहमवाप्स्यन्ति। शालिहोत्रेण पुनरेतदुक्तम् यद्वानरवसयाऽश्वानां वह्निदाहदोषः प्रशाम्यति। तन्नूनमेतेन भाव्यमत्र निश्चयः।' एवं निश्चित्य सर्वान् वानरानाहूय रहसि प्रोवाच यत्—

मेषेण सूपकाराणां कलहो यत्र जायते।
स भविष्यत्यसन्दिग्धं वानराणां क्षयावहः॥
तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।
तद् गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥

तथा च—

कलहान्तानि हर्म्याणि, कुवाक्यान्तं च सौहृदम्॥
कुराजान्तानि राष्ट्राणि, कुकर्मान्तं यशो नृणाम्॥

तद् यावत् सर्वेषां संक्षयो भवति तावदेतद्राजगृहं संत्यज्य वनं गच्छामः।

अथ तत्तस्य वचनमथद्दैयं श्रुत्वा मदोद्धता वानराः प्रहस्य प्रोचुः—भोः, भवतो वृद्धभावाद् बुद्धिवैकल्यं सञ्जातं येनैतद् प्रवोचि। उक्तं च—

"वदनं दशनैर्हीनं, लाला स्रवति नित्यशः।
न मतिः स्फुरति क्वापि बाले वृद्धे विशेषतः॥"

न वयं स्वर्गसमानोपभोगात् नानाविधान् भक्ष्यविशेषान् राजपुत्रैः स्वहस्तदत्तानमृतकल्पान् परित्यज्य तत्राटव्यां *कषाय-कटु-तिक्त-क्षार-रूक्षफलानि भक्षयिष्यामः।*

तत् श्रुत्वाश्रुकलुषां दृष्टिं कृत्वा स प्रोवाच—रे रे मूर्खाः, यूयमेतस्य सुखस्य परिणामं न जानीथ। किं न पाकरसास्वादनप्रायमेतत् सुखं परिणामे विषवद् भविष्यति? तदहं कुलक्षयं स्वयं नावलोकयिष्यामि, साम्प्रतं वनं यास्यामि। उक्तं च—

"मित्रं व्यसनसम्प्राप्तं, स्वस्थानं परपीड़ितम्।
धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम्॥"

एवमभिधाय सर्वांस्तान् परित्यज्य स यूथाधिपोऽटव्यां गतः।

अथ तस्मिन् गतेऽन्यस्मिन्नहनि स मेषो महानसे प्रविष्टो यावत् सूपकारेण नान्यत् किञ्चित् समासादितम् तावदर्द्धज्वलितकाष्ठेन ताड्यमानो जाज्वल्यमानशरीरः

मन्दायमानोऽश्वकुट्यां प्रत्यासन्नवर्त्तिन्यां प्रविष्टः। त
तृणप्राचुर्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्वत्रापि वह्नि
ज्वालाकुलया समुत्थिता यथा केचिदश्वाः स्फुटितलोचना
पञ्चत्वं गताः, केचिद्बन्धनानि त्रोटयित्वार्द्धदग्धशरी
इतश्चेतश्च ह्रेषायमाणा धावमानाः सर्व्वमपि जनसमू
माकुलीचक्रुः।

अत्रान्तरे राजा सविषादः शालिहोत्रज्ञान् वैद्यानाहू
प्रोवाच—भोः, प्रोच्यतामेषामश्वानां कश्चिद्दाहोप
शमनोपायः। तेऽपि शास्त्राणि विलोक्य प्रोचुः—दे
प्रोक्तमत्र विषये भगवता शालिहोत्रेण यत्—

"कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।
अश्वानां नाशमभ्येति तमः सूर्योदये यथा॥"

तत् क्रियतामेतच्चिकित्सितं द्राक्, यावदेते न दाहदोषे
विनश्यन्ति।

सोऽपि तदाकर्ण्य समस्तवानरवधमादिष्टवान्। कि
बहुना, सर्व्वेऽपि ते वानरा विविधायुध-लगुड-पाषाणादिभि
र्व्यापादिता इति।

अथ सोऽपि वानरयूथपतिः पुत्र-पौत्र-भ्रातृसुत-
भागिनेयादिसंक्षयं ज्ञात्वा परं विषादमुपागतः। स
त्यक्ताहारक्रियो वनाद्वनं पर्यटति, अचिन्तयच्च—कथमह
नृपापसदस्यानृणताकृत्येनापकृत्यं करिष्यामि

उक्तं च—

"मर्पयेदर्पणां योऽत्र वंशजां परनिर्मिताम् ।
भयाद्वा यदि वा कामात् स प्रेयः पुरुषाधमः ॥"

अथ तेन वृद्धवानरेण कुत्रचित् पिपासाकुलेन भ्रमता पद्मिनीखण्डमण्डितं सरः समासादितम्। तद् यावत् सूक्ष्मेक्षिकयावलोकयति तावद्वनचरमनुष्याणां पदपङ्क्ति-प्रवेशोऽस्ति, न निष्क्रमणम्। ततश्चिन्तितम्—नूनमत्र जलान्ते दुष्टग्राहेण भाव्यम्। तत् पद्मिनीनालमादाय दूरस्थोऽपि जलं पिबामि।

तथानुष्ठिते तन्मध्याद्राक्षसो निष्क्रम्य रत्नमालाविभूषित-कण्ठस्तमुवाच—भोः, अत्र यः सलिले प्रवेशं करोति स मे भक्ष्य इति। तन्नास्ति धूर्ततरस्त्वत्समोऽन्यो यत् पानीयमनेन विधिना पिबसि, ततस्तुष्टोऽहम्, प्रार्थयस्व हृदयवाञ्छितम्।

कपिराह—भोः, कियती ते भक्षणशक्तिः? स आह—शत-सहस्रायुत-लक्षाण्यपि जलप्रविष्टानि भक्षयामि, बाह्यतः शृगालोऽपि मां दूषयति।

वानर आह—अस्ति मे केनचिद् भूपतिना सहात्यन्तं वैरम्, यद्येनां रत्नमालां मे प्रयच्छसि तत् सपरिवारमपि तं भूपतिं वाक्प्रपञ्चेन लोभयित्वात्र सरसि प्रवेशयामि। सोऽपि श्रद्धेयं वचनमस्य श्रुत्वा रत्नमालां दत्त्वा प्राह—भो मित्र, यत् समुचितं भवति तत् कर्तव्यम् इति।

वानरोऽपि रत्नमालाविभूषितकण्ठो वृक्षप्रासादेषु परिभ्रमन् कैश्चिद् दृष्टः, पृष्टश्च भो यूथप, भवानियन्तं कालं कुत्र स्थितः ? भवतीदृग्रत्नमाला कुत्र लब्धा, या दीप्त्या सूर्यमपि तिरस्करोति ?

वानर आह—अस्ति कुत्रचिदरण्ये गुप्ततरं महत् सरो धनदनिर्मितम्। तत्र सूर्येऽर्धोदिते रविवारे यः कश्चित् मज्जति स धनदप्रसादादीदृग्रत्नमालाविभूषितकण्ठो निःसरति।

अथ भूभुजा तदाकर्ण्य स वानरः समाहूतः, पृष्टश्च— भो यूथाधिप, किं सत्यमेतत् ? रत्नमालासनाथं सरोऽस्ति क्वापि ? कपिराह—स्वामिन्, एष प्रत्यक्षतया मत्कण्ठ-स्थितया रत्नमालया प्रत्ययस्ते। तद् यदि रत्नमालया प्रयोजनं तदा मया सह कमपि प्रेषय येन दर्शयामि।

तत् श्रुत्वा नृपतिराह—यद्येवं तदहं सपरिजनः स्वय-मेष्यामि येन प्रभूता रत्नमालाः सम्पद्यन्ते। वानर आह— एवं क्रियताम्।

तथानुष्ठिते भूपतिना सह रत्नमालालोभेन सर्वं कलत्र-भृत्याः प्रस्थिताः। वानरोऽपि राज्ञा दोलाधिरूढेन स्वोत्सङ्ग आरोपितः सुखेन प्रीतिपूर्वमानीयते।

अथवा साध्विदमुच्यते—

"तृष्णे देवि नमस्तुभ्यं यया वित्तान्विता अपि।
अकृत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि॥"

तथा च—

"इच्छति शती सहस्रं, सहस्री लक्षमीहते।
लक्षाधिपस्तथा राज्यं, राज्यस्थः स्वर्गमीहते॥
जीर्यन्ते जीर्यतः केशा, दन्ता जीर्यन्ति जीर्यतः।
जीर्यतश्चक्षुषी श्रोत्रे, तृष्णैका तरुणायते॥"

अथ तत् सरः समासाद्य वानरः प्रत्यूषसमये राजानमुवाच—देव, मध्याह्नादिते सूर्येऽत्र प्रविष्टानां सिद्धिर्भवति। तत् सर्वोऽपि जन एकदैव प्रविशतु, त्वया पुनर्मया सह प्रवेष्टव्यं येन पूर्वदृष्टस्थानमासाद्य प्रभूतास्ते रत्नमाला दर्शयामि।

अथ प्रविष्टास्ते लोकाः सर्वे भक्षिता राक्षसेन। अथ तेषु चिरायमाणेषु राजा वानरमाह—भो यूथाधिप, किमिति चिरयति मे जनः?

तत् श्रुत्वा वानरः सत्वरं वृक्षमारुह्य राजानमुवाच—भो दुष्टनरपते, राक्षसेनान्तःसलिलस्थितेन भक्षितास्ते परिजनाः; साधितं मया कुलक्षयजं वैरम्। तद् गम्यताम्; त्वं स्वामीति मत्वा नात्र प्रवेशितः। उक्तं च—

"कृते प्रतिकृतं कुर्याद्धिंसिते प्रतिहिंसितम्।
न तत्र दोषं पश्यामि दुष्टे दुष्टं समाचरेत्॥"

मम कुलक्षयः कृतः, मया पुनस्तव इति।

अथैतदाकर्ण्य राजा कोपाविष्टः पदातिरेकाकी यथायातमार्गेण निष्क्रान्तः।

अथ तस्मिन् भूपतौ गते राक्षसस्तृप्तो जलाद्विनिष्क्रम्य सानन्दमिदमाह—

हतः शत्रुः, कृतं मित्रं, रत्नमाला न हारिता।
नालेनापिबता तोयं भवता साधु वानर॥

अतः साध्विदमुच्यते—

'यो लौल्यात् कुरुते कर्म नैवोदर्कमवेक्षते।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः॥'

तथा च —

"[illegible]
[illegible]
[illegible]
[illegible]"

अथ तत् सरः समासाद्य वानरः प्रत्युत्पन्नमती राजानमुवाच—देव, अत्रास्मिन् सर्वेऽन्तर्विशन्ति सिद्धिमेवेति। तत् सर्वोऽपि जन एकदैव प्रविशतु, त्वया पुनर्मया सह प्रविश्य येन पूर्वोद्दिष्टस्थानमासाद्य प्रभूतानि रत्नानि दर्शयामि।

अथ प्रविष्टास्ते सर्वे भक्षिता राक्षसेन। अथ तेषु चिरायमाणेषु राजा वानरमाह भो यूथाधिप, किमिति चिरायते मे जनः।

तत् श्रुत्वा वानरः सत्वरं वृक्षमारुह्य राजानमुवाच— भो दुष्टनरपते, राक्षसेनान्तःसलिलस्थितेन भक्षितास्ते परिजनः; साधितं मया कुलक्षयस्य वैरम्। तद् गम्यताम्; त्वं स्वामीति मत्वा नात्र प्रवेशितः। उक्तं च—

"कृते प्रतिकृतिं कुर्याद्धिंसिते प्रतिहिंसितम्।
न तत्र दोषं पश्यामि दुष्टे दुष्टं समाचरेत्॥"

तत्त्वया मम कुलक्षयः कृतः, मया पुनस्तव इति।

अथैतदाकर्ण्य राजा कोपाविष्टः पदातिरेकाकी यथायातमार्गेण निष्क्रान्तः।

अथ तस्मिन् भूपतौ गते राक्षसस्तुष्टो जलाद्विष्क्रम्य सानन्दमिदमाह—

हतः शत्रुः, कृतं मित्रं, रत्नमाला न हारिता।
नालेनापिबता तोयं भवता साधु वानर ॥

अतः साध्विदमुच्यते—

'यो लौल्यात् कुरुते कर्म नैवोदर्कमवेक्षते।
विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः ॥'

हितोपदेशः

कङ्कणलुब्धपान्थकथा

दक्षिणारण्ये एको वृद्धव्याघ्रः स्नातः कुशहस्तः कदाचित् सरस्तीरे ब्रूते—भो भोः पान्थाः, इदं सुवर्णकङ्कणं गृह्यताम्। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम्—भाग्येनैतत् सम्भवति। किन्त्वस्मिन्नात्मसन्देहे प्रवृत्तिर्न विधेया। यतः—

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।
यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे॥

किन्तु सर्वत्रार्थार्जने प्रवृत्तिः सन्देह एव। तथा चोक्तम्—

"न संशयमनारुह्य नरो भद्राणि पश्यति।
संशयं पुनरारुह्य यदि जीवति पश्यति॥"

तन्निरूपयामि तावत्। प्रकाशं ब्रूते—कुत्र तव कङ्कणम्? व्याघ्रो हस्तं प्रसार्य दर्शयति।

पान्थोऽवदत्—कथं मारात्मके त्वयि विश्वासः ?

व्याघ्र उवाच—शृणु रे पान्थ, प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेक-गोमानुषाणां वधान्मे पुत्रा मृता दाराश्च, वंशहीनश्चाहम्। ततः केनचिद् धार्मिकेणाहमादिष्टः—दानधर्मादिकं चरतु भवान्। तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो न कथं विश्वासभूमिः ? यतः—

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति॥

मम चैतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि, तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः। मया च धर्मशास्त्राण्यधीतानि। शृणु—

"मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन॥
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः॥"

त्वं चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम्। तथा चोक्तम्—

> "दरिद्रान् भर कौन्तेय, मा प्रयच्छेश्वरे धनम्।
> व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः॥"

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।

ततो यावदसौ तद्वचःप्रतीतो लोभात् सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्—अहह! महापङ्के पतितोऽसि, अतस्त्वामहमुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत्—

> न धर्मशास्त्रं पठतीति कारणं
> न चापि वेदाध्ययनं दुरात्मनः।
> स्वभाव एवात्र तथातिरिच्यते
> यथा प्रकृत्या मधुरं गवां पयः॥

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः। तथा चोक्तम्—

> "नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा।
> विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥"

यत —

कुलाचारं जलाचारं [illegible] , [illegible] ।
धार्मिकाः, नास्तिकाश्च [illegible] गृह्णाति भूमि ॥

अपरञ्च प्रश्न—

राजानं प्रथमं विन्देत्, ततो भार्यां, ततो धनम् ।
राजन्यसति लोकेऽस्मिन् कुतो भार्या, कुतो धनम् ॥

अन्यच्च

पर्जन्य इव भूतानामाधारः पृथिवीपतिः ।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ।

तद् यथा [illegible] न वर्धते, तथा [illegible] [illegible] इत्थं [illegible] ।

तथा,सा [illegible] [illegible] [illegible] धर्मेण [illegible] निमग्न । [illegible] –अत्र शृगाल । [illegible] । [illegible] निर्गतो,ऽस्म [illegible] । शृगालेन [illegible] –हेत । अत्र पुस्तके [illegible] [illegible], [illegible] तथा विश्वासः [illegible] [illegible] , तथा चोक्तम्

'यदासत्सङ्गरहितो भविष्यसि भविष्यसि ।
तदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ।'

गुणस्य दोषत्वम्

अस्ति वाराणस्यां कर्पूरपटो नाम रजकः। स चैकदा निर्भरं प्रसुप्तः, तदनन्तरं द्रव्याणि हर्तुं तद्गृहं चोरः प्रविष्टः। तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति, कुक्कुरश्चोपविष्टः। तं चोरमवलोक्य गर्दभः श्वानमाह—सखे! भवतस्तावदयं व्यापारः, तत् किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि?

कुक्कुरो ब्रूते—भद्र! मम नियोगस्य चर्चा त्वया न कर्तव्या; त्वमेव जानासि यथाहमस्य गृहरक्षां करोमि, यतोऽयं चिरान्निर्भयो ममोपयोगं न जानाति, तेनाधुना ममाहारदानेऽपि मन्दादरः; विना विधुरदर्शनं स्वामिनोऽनुजीविषु मन्दादरा भवन्ति।

गर्दभो ब्रूते—शृणु रे बर्बर!

याचते कार्यकाले यः
स किंभृत्यः, स किंसुहृत्।

कुक्कुरो ब्रूते—

यो न सम्भावयेद् भृत्यान्
कार्यकाले स किंप्रभुः॥

ततो गर्दभः सकोपमाह—अरे! पापीयांस्त्वम्,

स्वामिकार्योपेक्षां करोषि, भवतु, यथा स्वामी जागर्ति तथा मया कर्तव्यम्, यतः—

पृष्ठतः सेवयेदर्कं, जठरेण हुताशनम्।
स्वामिनं सर्वभावेन, परलोकममायया॥

इत्युक्त्वा सोऽतीव चीत्कारं कृतवान्।

ततः स रजकस्तेन चीत्कारेण प्रबुद्धो निद्राविमर्दकोपादुत्थाय गर्दभं लगुडेन ताडयामास, ततस्तेन ताडनेन गर्दभः पञ्चत्वं गतः।

प्रभोरादरः

अस्त्युत्तरापथे अर्बुदशिखरनाम्नि पर्वते दुर्दान्तो नाम महाविक्रमः सिंहः, तस्य पर्वतकन्दरमधिशयानस्य केसराग्रं मूषिकः कश्चित् प्रत्यहं छिनत्ति। स सिंहः केसराग्रं लूनं बुद्ध्वा कुपितः, विवरान्तर्गतं मूषिकमलभमानोऽचिन्तयत्— किं विधेयमत्र? भवतु, एवं श्रूयते—

"क्षुद्रशत्रुर्भवेद् यस्तु विक्रमान्नैव लभ्यते।
तमाहर्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः॥"

तेन ग्रामं गत्वा दधिकर्णनामा बिडालो सन्तोष्य प्रयत्नादानीय स्वकन्दरे स्थापितः।

ततस्तच्छब्दान्मूषिको बहिर्न निःसरति, तेनासौ सिंहो ऽक्षतकेसरः सुखं स्वपिति; मूषिकशब्दं यदा यदा शृणोति तदा तदा तं बिडालं मांसाहारदानेन संवर्धयति।

अथैकदा स मूषिकः क्षुधापीडितो बहिः संचरन्नेव मार्जारेण प्राप्तो व्यापादितः खादितश्च। अनन्तरं स सिंहो यदा कदाचिदपि मूषिकशब्दं न शुश्राव, तदोपयोगाभावात् तस्य बिडालस्याहारदाने मन्दादरो बभूव।

'निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद् दधिकर्णवत्॥'

बुद्धिबलम्

'उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः॥'

कस्मिंश्चित् तरौ वायसदम्पती निवसतः, तयोरपत्यानि तरुकोटरावस्थितेन कृष्णसर्पेण खादितानि।

पुनर्गर्भवती वायसी वायसमाह—स्वामिन्! त्यज्यतामयं तरुः, अत्र यावत् कृष्णसर्पस्तावदावयोः सन्ततिः कदाचिदपि न जीविष्यति ; यतः—

> दुष्टा भार्या, शठं मित्रं, भृत्यश्चोत्तरदायकः।
> ससर्पे च गृहे वासो, मृत्युरेव न संशयः ॥

वायसो ब्रूते—प्रिये! न भेतव्यम् ; वारं वारं मयैतस्य महापराधः सोढ़ः, इदानीं पुनर्न क्षन्तव्यः। वायस्याह—कथमनेन बलवता कृष्णसर्पेण सार्द्धं भवान् विग्रहीतुं समर्थः स्यात्? वायसो ब्रूते—अलमनया चिन्तया ; यतः—

> 'बुद्धिर्यस्य बलं तस्य, निर्बुद्धेस्तु कुतो बलम्?
> पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥'

वायस्याह—कथमेतत्? वायसः कथयति :—

'अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः, स च सर्वदा पशूनां वधं विदधान एवास्ते। ततः सर्वैः पशुभिर्मिलित्वा स सिंहो विज्ञप्तः—देव! किमर्थं सर्वपशुवधः क्रियते? यदि प्रसादो भवति, ततो वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः। सिंहेनोक्तम्—यद्येतदभिमतं भवताम्, तर्हि भवतु तत्। ततः प्रभृति प्रत्यहमेकैकं पशुमुपकल्पितं भक्षयन्नास्ते।

अथ कदाचित् कस्यापि वृद्ध-शशकस्य वारः समायातः, ततः सोऽचिन्तयत्—

त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया।
पञ्चत्वं चेद् गमिष्यामि किं सिंहानुनयेन मे ?

तन्मन्दं मन्दमुपगच्छामि। ततः सिंहोऽपि क्षुधापीडितः कोपात् तमुवाच—कुतस्त्वं विलम्बादागतोऽसि ?

शशकोऽब्रवीत्—देव! नाहमपराद्धः; आगच्छन् पथि सिंहान्तरेण बलाद्धृतः, तस्याग्रे पुनरागमनाय शपथं कृत्वा, स्वामिनं निवेदयितुमत्रागतोऽस्मि। सिंहः सकोपमाह—सत्वरं गत्वा दर्शय मे क्वासौ दुरात्मा तिष्ठति।

ततः शशकस्तं गृहीत्वा गभीर-कूपसमीपं गतः—अत्रागत्य स्वयमेव पश्यतु स्वामीत्युक्त्वा, तस्मिन् कूपजले तस्यैव सिंहस्य प्रतिबिम्बं दर्शितवान्। ततोऽसौ क्रोधाध्मातो दर्पात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः।'

अतोऽहं ब्रवीमि—बुद्धिर्यस्य इत्यादि।

वायस्याह—श्रुतं मया; सम्प्रति यथाकर्तव्यं ब्रूहि। वायसोऽवदत्—प्रिये! अत्रासन्ने सरसि राजपुत्रः प्रत्यहमागत्य स्नाति, स्नानसमये तदङ्गादवतारितं तीर्थशिलानिहितं कनकसूत्रं चञ्च्वा धृत्वानीय अस्मिन् कोटरे धारयिष्यसि।



ततः स्वामिवचनात् सा तत्रैव प्रसूता। एतत् सर्वं श्रुत्वा समुद्रेणापि तच्छक्तिज्ञानार्थिना तदण्डान्यपहृतानि।

ततस्तु टिट्टिभी शोकार्ता भर्तारमाह—नाथ! कष्टमापतितम्, अण्डानि मे नष्टानि। टिट्टिभोऽवदत्—प्रिये! मा भैषीः; इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गतः। तत्र गत्वा तेन निजाण्डानां विनाशकथा निवेदिता।

ततो गरुत्मता तद्वचनमाकर्ण्य प्रभुर्भगवान् नारायणः सृष्टि-स्थिति-प्रलय-हेतुर्विज्ञप्तः, स समुद्रमण्डदानायादिदेश। ततो भगवदाज्ञां मौलौ निधाय समुद्रस्तान्यण्डानि समर्पितवान्।

बक-राजहंसकथा

अस्ति कर्पूरद्वीपे पद्मकेलिनामधेयं सरः, तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति। स च सर्वैर्जलचरपक्षिभिर्मिलित्वा पक्षिराज्येऽभिषिक्तः। यतः—

यदि न स्यान्नरपतिः सम्यङ् नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव॥

अपरं च—

प्रजां संरक्षति नृपः, सा वर्धयति पार्थिवम्।
वर्धनाद्रक्षणं श्रेयस्तदभावे सदप्यसत्॥

विपरीतं फलम्

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मली-तरुः, तत्र निर्मितनीडक्रोडे पक्षिणः सुखेन निवसन्ति। अथैकदा वर्षासु नीलपटलैरिव जलधर-पटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव।

ततो वानरांस्तरुतलेऽवस्थितान् शीतार्तान् कम्पमानानवलोक्य कृपया पक्षिभिरुक्तम्—भो भो वानराः! शृणुत—

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः।
हस्तपादादि संयुक्ता यूयं किमवसीदथ ?

तत् श्रुत्वा वानरैर्जातामर्षैरालोचितम्—अहो! निर्वात-नीडगर्भावस्थिताः सुखिनः पक्षिणोऽस्मान् निन्दन्ति, तद् भवतु तावद् वृष्टेरुपशमः। अनन्तरं शान्ते पानीय-वर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीडा भग्नाः, तेषां पक्षिणामण्डानि चाधःपातितानि।

अतस्तु—

'विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याथ स्थानभ्रष्टा ययुः खगाः॥'

एकदासौ राजहंसः सुविस्तीर्णकमलपर्यङ्के सुखासीनः परिवार-परिवृतस्तिष्ठति। ततः कुतश्चिद्देशादागत्य दीर्घमुखो नाम बकः प्रणम्योपविष्टः। राजाह—दीर्घमुख, देशान्तरादागतोऽसि, वार्त्तां कथय।

स ब्रूते—देव, अस्ति महती वार्त्ता। तामाख्यातुकाम एव सत्वरमागतोऽहम्। श्रूयताम्

अस्ति जम्बुद्वीपे विन्ध्यो नाम गिरिः, तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति। तस्यानुचरैश्चरद्भिः पक्षिभिरहं दग्धारण्यमध्ये चरन्नवलोकितः, पृष्टश्च—कस्त्वम्? कुतः समागतोऽसि? तदा मयोक्तम्—कर्पूरद्वीपस्य राजचक्रवर्त्तिनो हिरण्यगर्भस्य राजहंसस्यानुचरोऽहम्, कौतुकाद्देशान्तरं द्रष्टुमागतोऽस्मि। एतच्छ्रुत्वा पक्षिभिरुक्तम्—अनयोर्देशयोः को देशो भद्रतरो राजा च? मयोक्तम्—आः! किमेवमुच्यते? महदन्तरम्। यतः कर्पूरद्वीपः स्वर्ग एव, राजहंसश्च द्वितीयः स्वर्गपतिः। अत्र मरुस्थले पतिता यूयं किं कुरुथ? आगच्छतास्मद्देशो गम्यताम्। ततोऽस्मद्वचनमाकर्ण्य सर्वे सकोपा बभूवुः। तथा चोक्तम्—

'पयःपानं भुजङ्गानां केवलं विषवर्द्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये॥'

विपरीतं फलम्

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मली-तरुः, तत्र निर्मितनीडक्रोडे पक्षिणः सुखेन निवसन्ति। अथैकदा वर्षासु नीलपटैरिव जलधर-पटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव।

ततो वानरांस्तरुतलेऽवस्थितान् शीतार्तान् कम्पमानानवलोक्य कृपया पक्षिभिरुक्तम्—भो भो वानराः! शृणुत—

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः।
हस्तपादादि संयुक्ता यूयं किमवसीदथ॥

तत् श्रुत्वा वानरैर्जातामर्षैरालोचितम्—अहो! निर्वात-नीडगर्भावस्थिताः सुखिनः पक्षिणोऽस्मान् निन्दन्ति, तद् भवतु तावद् वृष्टेरुपशमः। अनन्तरं शान्ते पानीय-वर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीडा भग्नाः, तेषां पक्षिणामण्डानि चाधःपातितानि।

उक्तञ्च—

'विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याज्ञान् स्थानभ्रष्टा ययुः खगाः॥'

अपायचिन्ताप्रयोजनम्

अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः; तत्र चिरात् सङ्कट-विकटनामानौ हंसौ निवसतः, तयोर्मित्रं कम्बुग्रीवनामा कूर्मश्च प्रतिवसति। अथैकदा धीवरैरागत्य तत्रोक्तम्, 'यदत्रास्माभिरद्योषित्वा प्रातर्मत्स्यकूर्मादयो व्यापादयितव्याः'।

तदाकर्ण्य कूर्मो हंसावाह—सुहृदौ! श्रुतोऽयं धीवरालापः? अधुना किं मया कर्तव्यम्? हंसावाहतुः—ज्ञायतां पुनस्तावत्, पश्चाद् यदुचितं तत् कर्तव्यम्। कूर्मो ब्रूते—मैवम्, यतो दृष्टव्यतिकरोऽहमत्र; तथा चोक्तम्—

'अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते, यद्भविष्यो विनश्यति॥'

हंसावाहतुः—कथमेतत्? कूर्मः कथयति :—

'पुराऽस्मिन्नेव सरसि, एवंविधेष्वेव धीवरेषूपस्थितेषु मत्स्यत्रयेणालोचितम्। तत्रानागतविधाता नामैको मत्स्यः, तेनोक्तम्—अहं तावज्जलाशयान्तरं गच्छामि; इत्युक्त्वा स ह्रदान्तरं गतः। अपरेण प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितम्—भविष्यदर्थे प्रमाणाभावात् कुत्र मया

[illegible] [illegible] [illegible] [illegible]। ततो [illegible]

[illegible] [illegible] [illegible]।

इति [illegible] [illegible] [illegible]॥

[illegible] [illegible] [illegible] [illegible] मन्दाय [illegible] ततो [illegible] [illegible] गभीरं नीरं प्रविष्टः, [illegible] [illegible] [illegible] [illegible]।

ततोऽहं ब्रवीमि [illegible] इत्यादि, तद् यथाहमस्य ह्रदं प्राप्नोमि तदत्र विधीयताम्।

हंसावाहतुः—अन्यत्र जलाशयप्राप्तौ [illegible] [illegible] स्थले गच्छतस्ते को विधिः? कूर्मो ब्रूते—यथाहं भवद्भ्यां सहाकाशवर्त्मना यामि, स उपायो विधीयताम्। हंसौ ब्रूतः—कथमुपायः सम्भवति? कच्छपो वदति—युवाभ्यां चञ्चुधृतं काष्ठखण्डमेकं मया मुखेनावलम्बितव्यम्, अतो भवतोः पक्षबलेन मयापि सुखेन गन्तव्यम्। हंसौ ब्रूतः—सम्भवत्येष उपायः, किन्तु

'उपायं चिन्तयन् प्राज्ञस्त्वपायमपि चिन्तयेत्।
पश्यतो बकमूर्खस्य नकुलैर्भक्षिताः सुताः॥'

कूर्मः पृच्छति—कथमेतत्? हंसौ कथयतः :—

'अस्त्युत्तरापथे गृध्रकूटो नाम पर्वतः; तत्रैव रेवातीरे न्यग्रोधपादपे बका निवसन्ति, तस्य वटस्याधस्ताद् विवरे सर्पस्तिष्ठति, स च बकानां बालापत्यानि खादति।

सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काकोऽवदत्—सखे मृग ! कोऽयं द्वितीयः ? मृगो ब्रूते—जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः।

काको ब्रूते—मित्र ! अकस्मादागन्तुना सह मैत्री न युक्ता, तत्र भद्रमाचरितम् ; तथा चोक्तम्—

'अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः॥'

तावाहतुः—कथमेतत् ? काकः कथयति :—

'अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः, तस्य कोटरे दैवदुर्विपाकाद् गलितनखनयनो जरद्गवो नाम गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चिदुद्धृत्य ददति, तेनासौ जीवति, शावकरक्षां च करोति।

अथ कदाचिद् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षितुं तत्रागतः, ततस्तमायान्तं दृष्ट्वा
कोलाहलः कृतः ; तत् श्रुत्वा
कोऽयमायाति ? दीर्घकर्णो
हा हतोऽस्मि ! यतः—

भयस्य भेतव्यं
तु भयं वीक्ष्य

भवतु, विश्वासमुत्पाद्यास्य समीपमुपगच्छामि ; इत्यालोच्योपसृत्याब्रवीत्—आर्य ! त्वामभिवन्दे ।

गृध्रोऽवदत्—कस्त्वम् ? सोऽवदत्—मार्जारोऽहम् । गृध्रो ब्रूते—दूरमपसर, नो चेद्धन्तव्योऽसि मया । मार्जारोऽवदत्—श्रूयतां तावन्मम वचनम्, ततो यद्यहं वध्यस्तदा हन्तव्यः ; यतः—

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ?
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥

गृध्रो ब्रूते—ब्रूहि किमर्थमागतोऽसि ? सोऽवदत्—अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचर्येण चान्द्रायणव्रतमाचरंस्तिष्ठामि । यूयं धर्मज्ञानरताः प्रेमविश्वासभूमय इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति, अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः ; भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः ! गृहस्थधर्मश्चैषः—

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरति द्रुमः ॥

किञ्च, यद्यन्नं नास्ति, तदा सुप्रीतेनापि वचसा तावदतिथिः पूज्यः ;

तृणानि, भूमिरुदकं, वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥

गृध्रोऽवदत्—मार्जारा हि मांसरुचयो भवन्ति पक्षिशावकाश्चात्र निवसन्ति तेनैवं ब्रवीमि। मार्जारोऽप्येवं श्रुत्वा, भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च—मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम्, यतः परस्परं विवदमानानामपि धर्मशास्त्राणामहिंसा परमो धर्म इत्यत्रैकमत्यम्

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः।

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः। ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। अथ येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः। पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि, अनन्तरं चानेनैव जरद्गवेनास्माकं शावकाः खादिता इति निश्चित्य, मिलित्वा स गृध्रो व्यापादितः।

अतोऽहं ब्रवीमि अज्ञातकुलशीलस्य इत्यादि।

इत्याकर्ण्य स जम्बुकः सकोपमाह मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एवासीत्, तत् कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते?

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

यथा चायं मृगो मम बन्धुस्तथा भवानपि। मृगोऽब्रवीत्—किमनेनोत्तरेण? सर्वैरेव विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम्। काकेनोक्तम्—एवमस्तु।

अथ प्रातः सर्वे यथाभिमतदेशं गताः। एकदा निभृतं शृगालो ब्रूते—सखे मृग! एतस्मिन्नेव वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति, तदहं त्वां तत्र नीत्वा दर्शयामि। तथा कृते सति, मृगः प्रत्यहं तत्र गत्वा सस्यं खादति, ततो दिनकतिपयेन क्षेत्रपतिना तद् दृष्ट्वा पाशास्तत्र योजिताः। अनन्तरं पुनरागतो मृगस्तत्र चरन् पाशैर्बद्धोऽचिन्तयत्—को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः?

अत्रान्तरं स जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्—फलितस्तावदस्माकं कपटः प्रबन्धः, मनोरथसिद्धिरपि बाहुल्यान्मे भविष्यति। यत एतस्योत्कृत्यमानस्य मांसासृगनुलिप्तानि अस्थीनि मयावश्यं प्राप्तव्यानि। स च मृगस्तं दृष्ट्वोल्लसितो ब्रूते—सखे! छिन्धि तावन्मम बन्धनम्, सत्वरं त्रायस्व माम्; यतः—

उत्सवे, व्यसने चैव, दुर्भिक्षे, राष्ट्रविप्लवे।
राजद्वारे, श्मशाने च यस्तिष्ठति स बान्धवः॥

इत्युक्त्वा मृगं यथाभाषितमाचरयित्वा पाशान् संवरितुं सयत्नो बभूव। ततः किंचिद्दूरेऽन्तरिते क्षेत्रपतौ स मृगः काकस्य शब्दं श्रुत्वा ससम्भ्रमः समुत्थाय पलायितः, तमुद्दिश्य तेन क्षेत्रपतिना प्रकोपात् क्षिप्तेन लगुडेन शृगालो व्यापादितः।

कुलीर Crab

प्रियवादी शत्रुः

अस्ति मालवविषये पद्मगर्भाभिधानं सरः, तत्रैको वृद्धबकः सामर्थ्यहीनमुद्विग्नमिवात्मानं दर्शयित्वा स्थितः। स च केनचित् कुलीरेण दूरादेव दृष्टः—किमिति भवानत्राहार-परिहारेण तिष्ठति?

बकेनोक्तम्—मत्स्या मम जीवनहेतवः, मत्स्यास्तावा-वश्यमेव कैवर्तैर्व्यापादयितव्या इति नगरोपान्ते मया कैवर्तालाप आकर्णितः; तदत्र वर्तनाभावादेवास्मन्मरण-मुपस्थितमिति ज्ञात्वा आहारेऽप्यनादरः कृतः।

ततः सर्वैर्मत्स्यैरालोचितम्—इह समये तावदुप-कारक एवायमुपलक्ष्यतेऽस्माकम्, तदयमेव यथाकर्तव्यं पृच्छ्यताम्। अथ मत्स्या ऊचुः—भो बक! कोऽस्माकं रक्षणोपायः?

जम्बूकः पार्श्वे मुद्गरं दृष्ट्वा विलोक्य विस्मयत्—दृढबन्धनबद्धोऽस्ति तावदयं मृगः, ब्रूते च—सखे ! स्नायुनिर्मिता एते पाशाः, तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि ? मित्र ! नान्यथा मन्तव्यम्, प्रभाते यत् त्वया वक्तव्यं तत् कर्तव्यमिति ॥

अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततोऽन्विष्यंस्तथाविधं दृष्ट्वोवाच—सखे ! किमेतत् ? मृगेणोक्तम्—अवधीरित-सुहृद्वाक्यस्य फलमेतत् । काको ब्रूते—स वञ्चकः क्वास्ते ? मृगेणोक्तम्—मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते—मित्र ! उक्तमेव मया पूर्वम् । ततः काको दीर्घं निःश्वस्याह—अरे वञ्चक ! किं त्वया पापकर्मणा कृतम् !

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसन्धं भगवति वसुधे ! कथं वहसि ?

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्—सखे मृग ! त्वमात्मानं मृतवत् सन्दर्श्य, वातेनोदरं पूरयित्वा, पादान् स्तब्धीकृत्य तिष्ठ, यदाहं शब्दं करोमि, तदा त्वं सत्वरमुत्थाय पलायिष्यसे । मृगस्तथैव काकवचनेन स्थितः ।

ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः, आलोक्य चासौ—आः ! स्वयं मृतोऽसि

इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान् संवरितुं लग्नो बभूव। ततः किंयद्दूरेऽन्तरिते क्षेत्रपतौ स मृगः काकस्य शब्दं श्रुत्वा ससम्भ्रमः समुत्थाय पलायितः, तमुद्दिश्य तेन क्षेत्रपतिना प्रकोपात् क्षिप्तेन लगुडेन शृगालो व्यापादितः।

…यवादी शत्रुः

अस्ति मालवविषये पद्मगर्भाभिधानं सरः, तत्रैको वृद्धबकः सामर्थ्यहीनमुद्विग्नमिवात्मानं दर्शयित्वा स्थितः। स च केनचित् कुलीरेण दूरादेव दृष्टः—किमिति भवानत्राहार-परिहारेण तिष्ठति?

बकेनोक्तम्—मत्स्या मम जीवनहेतवः, मत्स्याश्चावश्यमेव कैवर्तैर्व्यापादयितव्या इति नगरोपान्ते मया कैवर्तालाप आकर्णितः; तदत्र वर्तनाभावादेवास्मन्मरणमुपस्थितमिति ज्ञात्वा आहारेऽप्यनादरः कृतः।

ततः सर्वैर्मत्स्यैरालोचितम्—इह समये तावदुपकारक एवायमुपलक्ष्यतेऽस्माकम्, तदयमेव यथाकर्तव्यं पृच्छ्यताम्। अथ मत्स्या ऊचुः—भो बक! कोऽस्माकं रक्षणोपायः?

बको ब्रूते—अस्ति रक्षणोपायो जलाशयान्तराश्रयणम्, तत्राहमेकैकशो युष्मान् नयामि। मत्स्यैरपि भयादुक्तम्—एवमस्तु।

ततोऽसौ दुष्टबकस्तान् मत्स्यानेकैकशो नीत्वा, कस्मिंश्चिद्देशे खादित्वा, पुनरागत्य वदति—ते मया जलाशयान्तरे स्थापिताः।

अनन्तरं कुलीरस्तमुवाच—भो बक! मामपि तत्र नय। ततो बकोऽप्यपूर्व-कुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान्।

कुलीरोऽपि मत्स्य-कण्टकाकीर्णां भूमिं दृष्ट्वाचिन्तयत्—हा हतोऽस्मि मन्दभाग्यः! भवतु, इदानीं समयोचितं व्यवहरामि। इत्यालोच्य स कुलीरस्तस्य बकस्य ग्रीवां चिच्छेद, स बकश्च पञ्चत्वं गतः।

शून्ये सौधनिर्माणम्

अस्ति देवीकोटनाम्नि नगरे देवशर्मा नाम ब्राह्मणः, तेन महाविषुव-संक्रान्त्यां सक्तुपूर्णशरावः प्राप्तः। ततस्तमादायासौ भाण्डपूर्ण-कुम्भकार-मण्डपिकायां रौद्रेणाकुलितः सुप्तः।

ततः सक्तुरक्षार्थं हस्ते दण्डमादायाचिन्तयत्—यद्यहमिमं सक्तुशरावं विक्रीय दश कपर्दकान् प्राप्नोमि, तदा तैः कपर्दकैर्घट-शरावादिकमुपक्रीय अनेकधा वृद्धैस्तैर्धनैः पुनः पुनः पूगवस्त्रादिकमुपक्रीय विक्रीय वाणिज्यं कृत्वा, लक्षसंख्यक-धनान्युत्पाद्य, विवाहचतुष्टयं करिष्यामि ; तदनन्तरं मम भार्यास्ताः सपत्न्यो यदान्योऽन्यं द्वन्द्वं करिष्यन्ति, तदाहं कोपाकुलस्ता लगुडेन ताडयिष्यामि ।

इत्यभिधाय तेन लगुडः क्षिप्तः, तेन सक्तुशरावश्चूर्णितः, भाण्डानि च बहूनि भग्नानि । ततो भग्नभाण्डशब्दादागत्य कुम्भकारेण गले हस्तं दत्त्वा ब्राह्मणस्तिरस्कृतो मण्डपाद् बहिष्कृतश्च ।

मित्रलाभो मित्रभेदश्च

अस्ति दक्षिणापथे सुवर्णवती नाम नगरी, तत्र वर्धमानो नाम वणिग्धनाधिपः प्रतिवसति । तस्य प्रभूतेऽपि वित्ते पुनरर्थवृद्धिः करणीयेति मतिर्बभूव, यतः—

अलब्धं चैव लिप्सेत, लब्धं रक्षेदवेक्षया ।
रक्षितं वर्धयेत् सम्यग्, वृद्धं तीर्थेषु निक्षिपेत् ॥

अवर्धमानस्यार्थः कालेन स्वल्पव्ययेऽप्यञ्जनवत् क्षयं याति, अनुपभुज्यमानश्च निष्प्रयोजन एव । तथा चोक्तम्—

> अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम् ।
> अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मभिः ॥

इति सञ्चिन्त्य वर्धमानः सञ्जीवक-नन्दकनामानौ द्वौ वृषभौ धुरि नियोज्य, शकटं नानाविधद्रव्यपूर्णं कृत्वा वाणिज्येन काश्मीरान् प्रति चलितः ।

अथ गच्छतस्तस्य दुर्गमे महारण्ये भग्नजानुः सञ्जीवको निपतितः । तं च तदवस्थमालोक्य वर्धमानस्तं परित्यज्य प्रस्थितः । सञ्जीवकोऽपि कथमपि खुरत्रये भारं कुर्वंस्तत्रैव वने स्थितः । ततो दिनेषु गच्छत्सु सञ्जीवकः स्वेच्छाहारादिलाभेन तस्मिन्वने परिभ्रमन् हृष्टपुष्टाङ्गो बलवाननदत् ।

तस्मिन् वने पिङ्गलकनामा सिंहः स्वभुजोपार्जितराज्यसुखमनुभवन्नास्ते । स चैकदा पिपासाकुलितः पानीयं पातुं यमुना-कच्छमगच्छत्, तेन च तत्र सिंहेनाननुभूतपूर्वं प्रलय-घन-गर्जितमिव सञ्जीवक-नर्दितमश्रावि । तत् श्रुत्वासौ पानीयमपीत्वा सचकितं परावृत्य स्वस्थानमागत्य, किमिदमित्यालोच्य तूष्णीं स्थितः ।

अथ तं तथाविधं दृष्ट्वा करटक-दमनकनामानौ मन्त्रिपुत्रौ शृगालौ मिथो मन्त्रयतः—

दम। करटक! किमित्ययमुदकार्थी स्वामी पानीयमपीत्वा मन्दमवतिष्ठते?

कर। मित्र! मम सम्मतेनास्य सेवैव न क्रियते, तत् किमस्य चेष्टानिरूपणेन? यतोऽनेन राज्ञा अवधीरिताभ्यामावाभ्यां महद्दुःखमनुभूतम्।

दम। तथापि स्वामिचेष्टा-निरूपणं सेवकैः कर्त्तव्यम्।

कर। यः सर्वाधिकारे नियुक्तः प्रधानमन्त्री स करोतु, यतोऽनुजीविना पराधिकारचर्चा न कर्त्तव्या; पश्य, पशूनामन्वेषणमस्माकं नियोगः, अतः स्वनियोगस्यैव चर्चा क्रियताम्। (विमृश्य) किञ्च तथापि चर्चया न प्रयोजनम्, यत आवयोर्भक्षितशेषाहारः प्रचुरस्तिष्ठति।

दम। (सरोषम्) कथम्? आहारमात्रार्थी भवान् नृपं सेवते? अयुक्तमेतत्; यतः—

यस्मिन् जीवति जीवन्ति बहवः स तु जीवतु।
काकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम्?

कर। अथ भवान् किं ब्रवीति?

दम। अयं तावत् स्वामी पिङ्गलकः पानीयमपीत्वा कुतोऽपि भयात् सचकितं परावृत्योपविष्टः।

कर। किं तत् त्वं जानासि?

दम। किं प्रज्ञावतामविदितमस्ति ? उक्तं च—

> "आकारैरिङ्गितैर्गत्या, चेष्टया, भाषणेन च।
> नेत्र-वक्त्र-विकारैश्च लक्ष्यतेऽन्तर्गतं मनः॥"

तदत्र भयप्रस्तावे अहमेनं प्रज्ञाबलेनात्मीयं करिष्यामि, यतः—

> यस्य यस्य हि यो भावस्तेन तेन हि तं नरम्।
> अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्॥

कर। अथ तत्र गत्वा किं वक्ष्यसि ?

दम। किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यामि तावत्, ज्ञात्वा च यथायं ममायत्तो भविष्यति तथा करिष्यामि, तद् भद्र! अनुजानीहि, पिङ्गलकसमीपं गच्छामि।

कर। शुभमस्तु, यथाभिप्रेतमनुष्ठीयताम्।

ततो दमनको विस्मित इव पिङ्गलकसमीपं गतः। अथ दूरादेव राज्ञा दृष्टः सादरं प्रवेशितस्तं साष्टाङ्गं प्रणम्योपविष्टः।

पिङ्ग। चिराद् दृष्टोऽसि।

। यद्यपि मया सेवकेन श्रीमद्देवपादानां न प्रयोजनमस्ति, तथापि प्राणाभिरनुजीविना कर्तव्यमित्यागतोऽस्मि; यद्यपि स्वामिना

चिरावधीरितस्य मे बुद्धिविनाशः शङ्क्यते, तदपि न; यतः—

कदर्थितस्यापि हि धैर्यवृत्ते-
र्बुद्धेर्विनाशो न हि शङ्कनीयः।
अधःकृतस्यापि तनूनपातो
नाधः शिखा याति कदाचिदेव॥

पिङ्ग। भद्र दमनक! किमेतत्? त्वमस्माकं प्रधानामात्यपुत्रः सुधीरियन्तं कालं नीत्वा कुतोऽपि पिशुन-वचनान्नागतोऽसि? इदानीं यथाभिलषितं ब्रूहि।

दम। देव! पृच्छामि किञ्चित्।

पिङ्ग। उच्यताम्।

दम। उदकार्थी स्वामी पानीयमपीत्वा किमिति विस्मित इवावतिष्ठते?

पिङ्ग। भद्रमुक्तं त्वया, किन्तु एतद्रहस्यं वक्तुमस्माकं विश्वासभूमिरस्ति न कोऽपि, त्वं तु तद्विधः; ततः शृणु, कथयामि—सम्प्रति वनमिदमपूर्वसत्त्वाधिष्ठितम्, अतोऽस्माकं त्याज्यम्; तथा च श्रुतस्त्वयाप्यपूर्वः शब्दो महान्? शब्दानुरूपेण च अस्य प्राणिनो बलेनापि सुमहता भवितव्यम्।

दम। देव! अस्ति तावदयं महान् भयहेतुः शब्दोऽस्माभिरप्याकर्णितः, किन्तु स किंमन्त्री, यः

प्रथमं शुद्धं स्वभूमित्यागं चोपदिशति; अपरञ्च, देव! अस्मिन् कार्यसन्देहे भृत्यानामुपयोग एव ज्ञातव्यः, यतः—

१ ७ ॥ बन्धु-स्त्री-भृत्यवर्गस्य बुद्धेः, सत्त्वस्य चात्मनः।
॥ आपन्निकष-पाषाणे नरो जानाति सारताम् ॥

पिङ्ग। भद्र! महती शङ्का मां बाधते।

दम। (स्वगतम्) अन्यथा राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं कथं मां सम्भाषसे? (प्रकाशम्) देव! यावदहं जीवामि, तावद्भयं न कर्तव्यम्; किन्तु करटकादयोऽप्याश्वास्यन्ताम्, यस्मादापत्प्रतिकाराय दुर्लभः पुरुष-समवायः। (Assemblage)

ततस्तौ करटक-दमनकौ राज्ञा महाप्रसादेन पूजितौ भयप्रतीकारं प्रतिज्ञाय चलितौ।

॥ कर। सखे दमनक! किं शक्यप्रतीकारोऽयं भय-हेतुरशक्यप्रतीकारो वेति न ज्ञात्वा भयोपशमं प्रतिज्ञाय, कथमयं महाप्रसादो गृहीतः? यतोऽनुपकुर्वाणो न कस्याप्युपायनं गृह्णीयात्, विशेषतो राज्ञः। without rendering any benefit to others

दम। (विहस्य) मित्र! तूष्णीमास्यताम्; ज्ञातं मया भयकारणम्, बलीवर्देन नर्दितम्; वृषभाश्चास्माकं भक्ष्याः, किं पुनः सिंहस्य। Silently

कर। यद्येवम्, तदा स्वामित्रासः किं तत्रैव
~ , ? उपचरित. (removed)
: sit
: bull

दम। यदि स्वामिवासस्तवैव रुच्यते (Allowed), तदा कथमप
अस्मत्प्रसाद-लाभः स्यात् ?

ततो दमनक-करटकौ सञ्जीवक-समीपं गतौ। तत्र करटकस्तरुतले साटोपमुपविष्टः। (Pride & Haughty)

दम। (सञ्जीवकमुपगम्य) अरे वृषभ! एषोऽहं राज्ञा पिङ्गलकेनारण्यरक्षार्थं नियुक्तः; सेनापतिः करटकः समाज्ञापयति—सत्वरमागच्छ, नो चेदस्मादरण्याद् दूरमपसर, अन्यथा ते विरुद्धं फलं भविष्यति। न जाने क्रुद्धः स्वामी किं विधास्यति।

सञ्जी। (सभयमुपगम्य प्रणिपत्य (bowing down) च) सेनापते! किं मया कर्तव्यम्, तदभिधीयताम्।

कर। वृषभ! यद्येवं कानने स्थातुमिच्छा वर्तते, तदा देवपादारविन्दं गत्वा प्रणम।

सञ्जी। तदभयवाचं प्रयच्छ (Give), गच्छामि।

कर। शृणु रे बलीवर्द! अलमनया शङ्कया, यतः—

(Imp) तृणानि नोन्मूलयति प्रभञ्जनो (storm, hurricane)
मृदूनि नीचैः प्रणतानि सर्वतः।
(lofty) समुच्छ्रितानेव तरून् प्रबाधते, (obstinate)
महान् महत्स्वेव करोति विक्रमम्॥

ततस्तौ सञ्जीवकं नातिदूरे संस्थाप्य पिङ्गलकसमीपं गतौ। ततो राज्ञा सादरमालोकितौ प्रणम्योपविष्टौ।

स्तब्ध। (एतदाकर्ण्य) शृणु भ्रातः! एतौ दमनक-करटकौ सन्धि-विग्रह-कार्याधिकारिणौ न धनाधिकारे नियोक्तव्यौ।

पिङ्ग। अस्ति तावदेवम्, किन्त्वेतौ सर्वथा न मे वचनकरौ।

स्तब्ध। एतत् सर्वथानुचितम्; यतः—

Imp

स्तब्धस्य नश्यति यशो, विषमस्य मैत्री,
नष्टेन्द्रियस्य कुलमर्थपरस्य धर्मः।
विद्याफलं व्यसनिनः, कृपणस्य सौख्यं,
राज्यं प्रमत्तसचिवस्य नराधिपस्य॥

सङ्गतः! सर्वथा मद्वचनं क्रियताम्, अयं शस्य-भक्षकः सञ्जीवको भोजनाधिकारे नियुज्यताम्।

तद्वचनात् तथानुष्ठिते सति, पिङ्गलक-सञ्जीवकयोः सर्वबन्धु-परित्यागेन महता स्नेहेन कालोऽतिवर्तते। ततोऽनुजीविनामप्याहारदाने शैथिल्यदर्शनाद् दमनक-करटकावन्योऽन्यं मन्त्रयतः —

दम। किमत्र विधेयम्? आत्मकृतोऽयं दोषः, स्वयंकृते च दोषे परिदेवनमप्यनुचितम्। (विहस्य) मित्र! सहसैव यथानयोः सौहार्दं मया कारितम्, तथा भेदोऽपि कार्यः।

कर। अस्त्वेवम्, किन्त्वनयोर्महान् नैसर्गिकः स्नेहः कथं भेदयितुं शक्यः?

दम। उपायविमर्शनीयः ; यदुपायेन शक्यम्, न तत् पराक्रमेण।

कर। यद्येवं तदा गच्छ, शिवास्ते सन्तु पन्थानः।

दम। (पिङ्गलकमुपगम्य, प्रणम्य) देव! अत्याहितं मन्यमानो निवेदयितुमागतः, यतः—

आपद्युन्मार्गगमने कार्यकालात्ययेषु च।
कल्याणवचनं ब्रूयादपृष्टोऽपि हितो नरः॥

पिङ्ग। (सादरम्) अथ भवान् किं वक्तुमिच्छति?

दम। अयं तावत्सञ्जीवकस्तवोपर्यसदृश-व्यवहारो लक्ष्यते, तथा चास्मत्सविधाने स्वामिनः शक्तित्रयनिन्दां कृत्वा राज्यमेवाभिलषति।

एतत् श्रुत्वा पिङ्गलकः सभयं साश्चर्यं तूष्णीं स्थितः।

दम। देव! सर्वामात्य-परित्यागं कृत्वा त्वयैवायं सकल-कार्याधिकारे नियुक्तः, अयं च महान् दोषः;

यः कुर्यात् सचिवायत्तां श्रियं तद्व्यसने सति।
सोऽन्धवज्जगतीपालः सीदेत् सञ्चारकैर्विना॥

स च सर्वकार्येषु स्वेच्छातः प्रवर्तते, तदत्र स्वामी प्रमाणम्।

पिङ्ग। (विमृश्य) भद्र! यद्यप्येवम्, तथापि सञ्जीवकेन सह मम महान् स्नेहः; पश्य—

कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः।
अशेषदोषदुष्टोऽपि कायः कस्य न वल्लभः?

दम। देव! श्रूयताम्, यत्त्वया मूलभृत्यानपास्य अयमागन्तुकः पुरस्कृतः, तन्न भद्रं कृतम्; यदि पुनर्विज्ञापितोऽपि स्वामी मद्वचनं न शृणोति, तदा भृत्यस्य न दोषः ; तथा चोक्तम्—

"अप्रियस्यापि पथ्यस्य परिणामः सुखावहः ।
वक्ता श्रोता च यत्रास्ति रमन्ते तत्र सम्पदः ॥"

पिङ्ग। महदाश्चर्यम्! यो मयाभयवाचं दत्त्वानीतः, संवर्धितश्च, स कथं द्रुह्यति ?

दम। देव!

अर्थेन चाय सम्मानः खलानां प्रीतये कृतः ?
फलन्त्यमृतसेकेऽपि न पथ्यानि विषद्रुमाः ॥

पिङ्ग। (स्वगतम्)—

न परस्यापवादेन परेषां दण्डमाचरेत् ।
आत्मनावगमं कृत्वा बध्नीयात् पूजयेत वा ॥

(प्रकाशम्) तदा सञ्जीवकः किं प्रत्यादिश्यताम् ?

दम। (ससम्भ्रमम्) देव! मा मा, एवं तावत् मन्त्रभेदो जायते।

पिङ्ग। कथमसौ ज्ञातव्यो द्रोहबुद्धिरिति ?

दम। यदासौ शृङ्गाग्र-प्रहरणाभिमुखश्चकित इवागच्छति, तदा ज्ञास्यति स्वामी।

स एवमुक्त्वा मन्दमन्दं सञ्जीवक-समीपमुपसर्पन् विस्मितमिवात्मानमदर्शयत्।

सञ्जी। (सादरम्) भद्र! कुशलं ते?

दम। अनुजीविनां कुतः कुशलम्?

(इत्युक्त्वा दीर्घं निश्वस्योपविष्टः)

सञ्जी। मित्र! मनोगतं सविस्तरं कथ्यताम्।

दम। (सुनिभृतम्) यद्यपि राजविश्वासोऽन्यस्मै न कथनीयः, तथापि भवानस्मदीयप्रत्ययादागतः स्थितश्च, तन्मया परलोकार्थिना अवश्यमेव तव हितमाख्येयम्; शृणु, अयं तवोपरि विकृतबुद्धी रहस्येवमुक्तवान्, यत् सञ्जीवकमेव हत्वा स्वपरिवारं तर्पयामि।

सञ्ज। (सविषादम्) कष्टं भोः! किमिदमापतितम्? हतोऽस्मि मन्दभाग्यः!

दम। अलं विषादेन, प्राप्तकालं कार्यमनुष्ठीयताम्।

सञ्जी। किं मयापकृतं राज्ञः? अथवा निर्निमित्तापकारिणो हि राजानः।

दम। अयं तावत् स्वामी वाग्मधुरो विषहृदयो मया ज्ञायते।

सञ्जी। कष्टं भोः! कथमहं शस्यभक्षकः सिंहेन व्यापादयितव्यः। अयुक्तं च तदाज्ञानुवर्तनम्, तदिदानीं संग्रामे मृत्युरेवाश्रयणीयः। (विमृश्य) भो मित्र! कथमसौ मां जिघांसुरिति ज्ञातव्यः?

दम। यदासौ स्तब्धकर्णः समुद्यतलाङ्गूल उन्नतचरणो विवृतास्यस्त्वां पश्यति, तदा त्वमपि स्वविक्रमं दर्शयिष्यसि; किन्तु सर्वमेतत् सुगुप्तमनुष्ठातव्यम्, नो चेत्, न त्वम्, नाहम्।

ततो दमनकः सिंहसमीपं गत्वा—देव। समागतोऽसौ पापाशयः, तत् सज्जीभूय स्थीयताम्; इत्युक्त्वा पूर्वोक्ताकारं कारयामास। सञ्जीवकोऽप्यागत्य तथाविधं विकृताकारं सिंहं दृष्ट्वा स्वानुरूपं विक्रमं चकार, ततस्तयोः प्रवृत्ते महाहवे सञ्जीवकः सिंहेन व्यापादितः।

पिङ्ग। (सेवकं व्यापाद्य सशोकम्) किं मया दारुणं कर्म कृतम्।

दम। स्वामिन्। कोऽयं नूतनो न्यायः, यदरातिं हत्वा सन्तापः क्रियते? तथा चोक्तम्—

"पिता वा, यदि वा भ्राता, पुत्रो वा, यदि वा सुहृत्।
प्राणच्छेदकरा राज्ञा हन्तव्या भूतिमिच्छता॥
क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम्॥"

ति कपटवचनेन दमनकेन सन्तोषितः स्वां प्रकृतिमापन्नः
लकः सिंहासने समुपविष्टः।

वेतालपञ्चविंशतिः



यज्ञसोमनाम्नो ब्राह्मणस्योपाख्यानम्

अथ पुनरानीयमानो वेतालः कथामपरां कथयति :—

देव! कलिङ्गविषये यज्ञस्थल-नामधेयं नगरमासीत्; तत्र यज्ञसोमनामा ब्राह्मणस्तिष्ठति। तस्य ब्राह्मणी सोमदत्ता, तस्यामनेन ब्रह्मस्वामी नाम पुत्र उत्पादितः; स च सर्व्वशास्त्रतत्त्वज्ञो भूत्वा देववशात् पञ्चत्वमगात्।

ततस्तत्पितरौ बहुविधं विलपन्तौ बन्धुजनसहितौ तमादाय श्मशाने सत्कारार्थमागमतुः। इत्येव काले श्मशानवासी योगी तं द्विजकुमारशरीरं सर्व्वशास्त्रवेत्तारं मनोहर-कलेवरमालोक्य करुणस्वरैर्घोरैः क्रन्दितवान्, परमकौतुकेन नर्त्तितवांश्च, सहसोत्थाय योगेन जीर्ण-शरीरं परित्यज्य मृतस्य द्विजकुमारस्य शरीरं प्रविवेश। कुमारे समुत्थिते तत्पितरौ परां प्रीतिमासादितवन्तौ, सर्व्वे बन्धुवर्गाश्च हर्षिता बभूवुः। ब्रह्मस्वामी ग्राम-सर्व्वभोगं परित्यज्य योगं ध्यायंस्तस्थौ।

श्मशानवासी योगी कथं चक्रन्द, कथं वा ननर्त, तत्कारणं वदतु, देव।

राजा वदति—शृणु रे वेताल। चिरकालमुपार्जितं शरीरं त्यक्तव्यमिति चक्रन्द, जीर्णशरीरं विहाय सद्गुणाधार-द्विजशरीरं प्राप्तव्यमिति ननर्त।

चतुर्णां ब्राह्मण-तनयानामुपाख्यानम्

अथ पुनरानीयमानो वेतालः कथामपरां कथयति :—

देव। दक्षिणस्यां दिशि ब्रह्मपुराभिधेयं नगरं पुरासीत्; तत्र विष्णुस्वामी नाम ब्राह्मण उवास। सोऽतीव धनहीनः, तस्य चत्वारः पुत्रा बभूवुः। कियता कालेन विष्णुस्वामिनि मृते, ते चत्वारः भ्रातरश्चादौ मातुलालयमगमन्। मातुलोऽपि तान् दरिद्रानवलोक्य न सम्भावयामास; ततस्ते मनःक्षुण्णं चक्रुः।

ततः कोऽपि बुधजनस्तान् सत्परामर्शमददात्—ब्राह्मण-कुमाराः! यूयं विद्याभ्यासं कुरुत, तदा सर्वं शुभं भविष्यति। तत् श्रुत्वा ते सत्परामर्शं परिगृह्य विद्यासिद्धये गतवन्तः।

अथैकदा कृतविद्यास्ते सर्व्वे मिलित्वा अन्योऽन्यं जिज्ञासामारेभिरे —

प्रथमेनोक्तम्—अहं मृतास्थि सञ्चयविद्यां जानामि।
अपरेणोक्तम्—अहं शोणित-सञ्चारविद्यां जानामि।
तृतीयेनोक्तम्—नख-लोम दन्त सञ्चयविद्यां जानामि।
चतुर्थेनोक्तम्—जीवयितुं जानामि विद्यापरीक्षा-चिकीर्षवो व्याघ्रास्थीनि समानीय व्याघ्रं जीवयामासुः।
सर्व्वे ततः प्राणसंचारेण व्याघ्रेण चत्वारो भक्षिताः।

वद राजन्! तेषां मध्ये को मूर्खतमो भवति।

राजा वदति—शृणु रे वेताल! जीवयिता मूर्खतमो भवति।

नृपतेरिति वादिनि वेताले शिंशपायाम् पुनर्लम्बितः।

विष्णुपुराणम्

मान्धातृकथा

क्षुवतश्च मनोरिक्ष्वाकुर्घ्राणतः पुत्रो जज्ञे। स इक्ष्वाकुरष्टकायाम्—उत्पाद्य श्राद्धार्हं मांसमानयेति विकुक्षिमाज्ञापयामास।

स तथेति गृहीतास्त्रो वनमभ्येत्यानेकान् मृगान् हत्वा अतिश्रान्तोऽतिक्षुत्परीतो विकुक्षिरेकं शशमभक्षयत्, शेषं च मांसमानीय पित्रे निवेदयामास। इक्ष्वाकुणापाप्याकु-कुलाचार्यस्तत्प्रोक्षणाय वसिष्ठः प्रचोदितः प्राह—अलममेनामेध्येनामिषेण; दुरात्मनानेन ते पुत्रेणैतन्मांसमुपहतम्, यतोऽनेन शशको भक्षितः।

ततश्चासौ विकुक्षिर्गुरुणैवमुक्तः शशादसंज्ञामवाप, पित्रापि च परित्यक्तः; पितर्युपरते चाखिलामेतां पृथ्वीं धर्मतः शशास। शशादस्य च पुरञ्जयो नाम पुत्रोऽभवत्।

पुरा हि त्रेतायां देवासुरमतीव भीषणं युद्धमासीत्, तत्र चातिबलिभिरसुरैरमराः पराजिता भगवन्तं विष्णुमाराधयाञ्चक्रुः। प्रसन्नश्च देवानामनादिनिधनः सकलजगत्परायणो नारायणः प्राह—ज्ञातमेव मया युष्माभि-

स्यमन्तकोपाख्यानम्

धर्मनिष्ठाविमौ, निघ्नस्य पुत्रौ प्रसेनसत्राजितौ। एकदा समुद्रतीरोपस्थितः सूर्यं सत्राजितस्तुष्टाव, तपस्तन्मयतया च भगवानभिष्टूयमानोऽग्रतस्तस्थौ। अस्पष्टमूर्त्ति-धरं चैनमालोक्य सत्राजितः सूर्यमाह—यथैव अम्बरे त्वां वह्निपिण्डोपममहमपश्यम्, तथैवाग्रतो गतमपि; अत्र न कश्चिद् भगवता प्रसादीकृतं विशेषमुपलक्षयामि इति।

एवमुक्ते भगवता सूर्येण निजकण्ठादुन्मुच्य स्यमन्तक-नामा मणिरवतार्यैकान्ते न्यस्तः, ततस्तमालोक्योऽत्यन्त-ज्ज्वल-वपुषमीषदापिङ्गल-नयनमादित्यमद्राक्षीत्, कृत-प्रणिपातस्तवादिकं च सत्राजितमाह भगवान्—वर-मस्मत्तोऽभिमतं वृणीष्वेति। स च तदेव मणिरत्नमयाचत, स चापि तस्मै तद् दत्वा वियति स्वं धिष्ण्यमारुरोह।

सत्राजितोऽप्यमल-मणिरत्न-सनाथकण्ठतया सूर्य इव तेजोभिरशेष-दिगन्तराण्युद्भासयन् द्वारकां विवेश। द्वारकावासि-जनगणस्तु तमायान्तमवेक्ष्य, भगवन्तं पुरुषोत्तमं प्रणिपत्याह—भगवन्! भवन्तमयं नूनं द्रष्टु-मायात्यादित्य इति।

आकर्ण्य प्रहस्य च तानाह भगवान्—नायमादित्यः; सत्राजितोऽयमादित्यदत्तं स्यमन्तकाख्यं महामणिं बिभ्र-दत्रोपयाति, तदेनं विस्रब्धाः पश्यत। इत्युक्तास्ते ययुः।

स च तं स्यमन्तकाख्यं महामणिमात्मनिवेशने सुरचितं चक्रे ; प्रतिदिनञ्च तन्मणिरत्नमष्टौ कनकभारान् स्रवति, तत्प्रभावाच्च सकलस्यैव राष्ट्रस्योपसर्गानावृष्टि-व्यालाग्नि-चौर-दुर्भिक्षादिभयं न भवति।

अच्युतोऽपि तद्रत्नमुग्रसेनस्य भूपतेर्योग्यमेतदिति लिप्साञ्चक्रे, गोत्रभेदभयाच्च शक्तोऽपि न जहार। सत्राजितोऽप्यच्युतो मामेतद् याचिष्यते इत्यवगतरत्नलोभः स्वभ्रात्रे प्रसेनाय तद्रत्नं दत्तवान्, यच्च शुचिना ध्रियमाणमशेषसुवर्णस्रावादिकं गुणमुत्पादयति, अन्यथा य एव धारयति तमेव हन्ति।

असावपि प्रसेनः स्यमन्तकेन कण्ठासक्तेनाश्वमारुह्याटव्यां मृगयामगच्छत्, तत्र च सिंहाद्वधमवाप ; साश्वं च तं निहत्य सिंहोऽप्यमलमणिरत्नमास्याग्रेणादाय गन्तुमुद्यतः, ऋक्षाधिपतिना जाम्बवता दृष्टो घातितश्च। जाम्बवानप्यमलं तन्मणिरत्नमादाय स्वबिलं प्रविवेश, सुकुमारक-संज्ञाय च बालकाय क्रीडनकमकरोत्।

अनागच्छति च तस्मिन् प्रसेने—कृष्णो मणिरत्नमभिलषितवान्, न च प्राप्तवान्, नूनमेतदस्य कर्म, अन्येन प्रसेनो हन्यते इत्यखिल एव यदुलोकः परस्परं कर्णाकर्णैकयत्।

विदितलोकापवाद-वृत्तान्तश्च भगवान् सर्वयदुसैन्य-परिवारः प्रसेनाश्व-पदवीमनुससार, ददर्श चाश्वसमेतं प्रसेनं

निहतं सिंहेन। अखिलजनपदमध्ये ... क्षतपरिशुद्धिः सिंहपदमनुससार, क्वचिन्निहतं च मध्यन्ये भूमिभागं दृष्ट्वा ततश्च तद्वशगोरवानुसारिपदान्यनुययौ। गिरितटे च सकलमेव यदुसैन्यमवस्थाप्य तत्पदानुसारी ऋक्षबिलं प्रविवेश, अप्रविष्टश्च धात्र्याः सुकुमारकमुल्लापयन्त्या वाणीं शुश्राव—

"सिंहः प्रसेनमवधीत्, सिंहो जाम्बवता हतः।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः॥"

इत्याकर्ण्य लब्धस्यमन्तकोदन्तोऽन्तःप्रविष्टः कुमारक्रीडनकीकृतं धात्रीहस्ते तेजोभिर्जाज्वल्यमानं च स्यमन्तकं ददर्श। तं च स्यमन्तकाभिलाषचक्षुषमपूर्वं पुरुषमागतमवेक्ष्य धात्री—त्राहि त्राहीति व्याजहार, तदार्तनादश्रवणानन्तरमामर्षपूर्णहृदयः स जाम्बवानाजगाम, तयोश्च परस्परं युध्यतोरेकविंशतिदिनान्यभवत्।

ते च यदुसैनिकास्तत्र सप्ताष्टदिनानि तन्निष्क्रान्तिमुदीक्षमाणास्तस्थुः, अनिष्क्रममाणे च मधुरिपौ,—असावस्मिन्नेव बिलेऽत्यन्तनाशमाप्तो भविष्यति, अन्यथा तस्य कथमेतावन्ति दिनानि शत्रुजये व्याक्षेपो भवति? इति कृताध्यवसाया द्वारकामागताः—हतः कृष्ण इति कथयामासुः; तद्बान्धवाश्च तत्कालोचितमखिलमुपरतक्रियाकलापं चक्रुः।

तत्र चास्य युध्यमानस्यातिगर्वाहव-विशिष्ट-धातोप-युक्तावतीयादिना ... बल प्रायपुष्टिरभूत्, भगवत्-वासुदेव-मति-गुरुगुरुप-भिद्यमानस्याति-निठुरप्रहारपीडिताखिलावयवस्य निराहारतया बलहानिः ।

निर्जितश्च भगवता जाम्बवान् प्रणिपत्याह—असुर-सुर-यक्ष-गन्धर्व-राक्षसादिभिरप्यखिलैर्भगवान् न जेतुं शक्यः, किं पुनरस्मद्विधैः । तदवश्यं भगवतोऽस्मत्स्वामिनो नारायणस्यांशेन भवता भवितव्यम् ।

भगवान् प्रीत्या करतल-स्पर्शेन चैनमपगतयुद्धखेदं चकार ; स च प्रणिपत्यैनं पुनरपि प्रसाद्य जाम्बवतीं नाम कन्यां गृहागमनार्घ्यभूतां ग्राहयामास, स्यमन्तकमणिमप्यसौ प्रणिपत्य तस्मै प्रददौ । अच्युतोऽप्यतिप्रणतात् तस्माद-ग्राह्यमपि तन्मणिरत्नमात्मशोधनाय जग्राह, सह जाम्बवत्या द्वारकामाजगाम ।

भगवदागमनोद्भूतहर्षोत्कर्षस्य द्वारकावासिजनस्य बहुकालव्यतीतमानुष्यमेवाति-परिणतवयसोऽपि नवयौवन-मिवाभवत्, आनकदुन्दुभि च—दिष्ट्या दिष्ट्येति सकल-यादवाः स्त्रियश्च सभाजयामासुः । भगवानपि यथानुभूतं सर्वमेव यादवसमाजे यथावदाचचक्षे, स्यमन्तकञ्च सत्राजिताय दत्त्वा मिथ्याभिशस्ति-विशुद्धिमवाप, जाम्बवतीञ्चान्तःपुरे निवेशयामास ।

पप्रच्छुः—भगवन्! अस्माकमत्र विरोधे कतरः पक्षो जेता भविष्यतीति। अथाह भगवान्—येषामर्थे रजिरात्तायुधो योत्स्यतीति।

अथ दैत्यैरुपेत्य रजिरात्मसाहाय्य-दानायाभ्यर्थितः प्राह—योत्स्येऽहं भवतामर्थे यद्यहममरजयाद् भवतामिन्द्रो भविष्यामीति।

आकर्ण्यैतत्तैरभिहितः—न वयमन्यथा वदिष्यामोऽन्यथा करिष्यामः, अस्माकमिन्द्रः प्रह्लादः, तदर्थमयमुद्यमः।

इत्युक्त्वा गतेष्वसुरेषु देवैरप्यसाववनीपतिरेवमेवोक्तः। तेनापि च तथैवोक्ते, देवैः—इन्द्रस्त्वं भविष्यसीति समन्वीप्सितम्; रजिनापि देवसैन्य-सहायेनानेकैर्महास्त्रै-स्तदशेषमसुरबलं निषूदितम्।

अथ जितारातिपक्षश्चेन्द्रो रजि-चरणयुगलमात्मशिरसा निपीड्याह—भयत्राणादन्नपिता भवान्; अशेषलोकाना-मुत्तमो भवान्, यस्याहं पुत्रस्त्रिलोकेन्द्रः।

स चापि राजा प्रहस्याह—एवमेवास्तु, अनति-क्रमणीया हि वैरिपक्षादप्यनेकविध-चाटुवाक्य-गर्भा प्रणतिः। इत्युक्त्वा स स्वपुरमाजगाम, शतक्रतुरपीन्द्रत्वं चकार।

स्वर्याते च रजौ नारदर्षिचोदिता रजिसुताः शतक्रतु-मात्मपितृपुत्रमाचाराद्राज्यं याचितवन्तः, अप्रदाने चावजित्येन्द्रमतिबलिनः स्वयमिन्द्रत्वं चक्रुः।

ततश्च बहुतिथे काले व्यतीते, बृहस्पतिमेकान्ते दृष्ट्वा अपहृत-त्रैलोक्ययज्ञभागः शतक्रतुराह—बदरीफलमात्र-मप्यर्हसि ममाप्यायनाय पुरोडाशखण्डं दातुम्।

इत्युक्तो बृहस्पतिरुवाच—यद्येवं पूर्वमेव त्वयाहं चोदितः स्याम्, तन्मया त्वदर्थे किमकर्तव्यम्? स्वल्पैरेवाहोभिस्त्वां निजं पदं प्रापयिष्यामि। इत्यभिधाय तेषामनुदिन-माभिचारिकं बुद्धिमोहाय, शक्रस्य च तेजोऽभिवृद्धये जुहाव।

ते चापि तेन बुद्धिमोहेनाभिभूयमाना ब्रह्मद्विषो धर्मत्यागिनो वेदवादपराङ्मुखा बभूवुः, ततश्च तानपेत-धर्माचारानिन्द्रो जघान, पुरोहिताप्यायित-तेजाश्च दिविमाक्रामत्।

एतदिन्द्रस्य स्वपदच्यावनारोहणं श्रुत्वा पुरुषः स्वपद-भ्रंशं दौरात्म्यं वा न चाप्नोति।

नहुषवंशाख्यानम्

यति ययाति संयातिप्रभृतयो नहुषस्य षट् पुत्रा महाबलपराक्रमा बभूवुः। यतिस्तु राज्यं नैच्छत्, ययातिस्तु भूभृदभवत्, उशनसश्च दुहितरं देवयानीं च वार्षपर्वीं शर्मिष्ठामुपयेमे।

यदुं च तुर्वसुं चैव देवयानी व्यजायत ।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥

काव्यशापाच्चाकालेनैव ययातिर्जरामवाप, प्रसन्नशुक्रवचनाच्च जरां संक्रामयितुं ज्येष्ठं पुत्रं यदुमुवाच—त्वन्मातामहशापादियमकालेनैव जरा मामुपस्थिता, तामहं तस्यैवानुग्रहाद् भवतः सञ्चारयाम्येकं वर्षसहस्रम्; न तृप्तोऽस्मि विषयेषु, त्वद्वयसा विषयानहं भोक्तुमिच्छामि, नात्र भवता प्रत्याख्यानं कर्तव्यम् ।

इत्युक्तः स नैच्छत् तां जरामादातुम्, तं चापि पिता शशाप—त्वत्प्रसूतिर्न राज्यार्हा भविष्यतीति । अनन्तरं च द्रुह्युम्, तुर्वसुम्, अनुं च पृथिवीपतिर्जरा-ग्रहणार्थं स्वयौवनप्रदानाय च चोदयामास, तैरप्येकैकशस्तेन प्रत्याख्यातस्ताञ्शशाप ।

अथ शर्मिष्ठातनयमशेषकनीयांसं पूरुं तथैवाह । स चातिप्रवणमतिः, प्रणम्य पितरं सबहुमानम्—महाप्रसादोऽयमस्माकमित्युदारमभिधाय जरां प्रतिजग्राह, स्वकीयं च यौवनं पित्रे ददौ ।

सोऽपि च नवं यौवनमासाद्य धर्माविरोधेन यथाकामं यथाकालोपपन्नं यथोत्साहं विषयं चचार, सम्यक् प्रजापालनमकरोत् ।
मयाप्याप्नोत्यनुदिनं

भगीतय कामानतीव रम्यान् मेने। ततयैवमगायत :—

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१॥
यत् पृथिव्यां व्रीहियवं, हिरण्यं, पशवः, स्त्रियः।
एकस्यापि न पर्याप्तं तदित्यतितृष्यं त्यजेत् ॥२॥
यदा न कुरुते भावं सर्वभूतेषु पापकम्।
समदृष्टेस्तदा पुंसः सर्वा एव सुखा दिशः ॥३॥
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः।
तां तृष्णां संत्यजन् प्राज्ञः सुखेनैवाभिपूर्यते ॥४॥
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः।
तथाप्यनुदिनं तृष्णा ममैतेष्वेव जायते ॥५॥
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम्।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥६॥ इति।

पराशर उवाच—

पूरोः सकाशादादाय जरां, दत्त्वा च यौवनम्।
राज्येऽभिषिच्य पूरुं च प्रययौ तपसे वनम् ॥

सगरवंशाख्यानम्

काश्यपदुहिता सुमतिर्विदर्भराजतनया च केशिनी द्वे भार्ये सगरस्यास्ताम्। ताभ्यां चापत्यार्थमाराधित और्वः परमेण समाधिना वरमदात्—एका वंशधरमेकं पुत्रमपरा षष्टिं पुत्रसहस्राणि जनयिष्यतीति यस्या यदभिमतं तदिच्छया गृह्यताम्। इत्युक्ते केशिनी पुत्रमेकं सुमतिः पुत्रसहस्राणि षष्टिं वव्रे, तथेति च महर्षिणाभिहिते-ऽल्पैरेवाहोभिरेकम् असमञ्जसं नाम वंशधरं पुत्रमसूत केशिनी, विनतातनयायास्तु सुमत्याः षष्टिः पुत्रसहस्राण्यभवन्। तस्मादसमंजसोऽंशुमान्नाम कुमारो जज्ञे।

स त्वसमंजा बाल्यादेवासद्वृत्तः, पिता चास्याचिन्तयत्—अयमतिबाल्यो बुद्धिमान् भविष्यतीति। अथ तत्रापि वयस्यतीते तच्चरितमिदं न पिता तत्याज। तान्यपि षष्टिः कुमारसहस्राणि असमञ्जसचरितमनुचक्रुः। ततस्त-समंजसचरितानुकारिभिः सागरैरपध्वस्तयज्ञादिसन्मार्गे जगति देवाः सकलविद्यामयमसंस्पृष्टमशेषदोषैर्भगवतः पुरुषोत्तमस्यांशभूतं कपिलर्षिं प्रणम्य तदर्थमूचुः—भगवन्! एभिः सगरतनयैरसमंजसचरितमनुगम्यते, कथमेभिरसुरचरित्रैर्जगद्भविष्यतीत्यार्त्तजगत्परित्राणाय च भगवतोऽत्र शरीरग्रहणम्। इत्याकर्ण्य भगवान्—अल्पैरेव दिनैरेते विनंक्ष्यन्तीत्युक्तवान्।

तत्रान्तरे च सगरो हयमेधमारेभे, तत्र पुत्रैरधिष्ठित-मस्याश्वं कोऽप्यपहृत्य भुवो विवरं प्रविवेश। ततश्चाश्वान्वेषणाय तनयान् युयोज, ततस्तत्तनयाश्चातिनिर्बन्धेन वसुधातलमेकैको योजनं योजनमवनेश्चखान। पाताले चाश्वं परिभ्रमन्तमवनिपतितनन्दनास्ते ददृशुः। नातिदूर-स्थितं च भगवन्तमपघने शरत्कालेऽर्कमिव तेजोभि-रनवरतमूर्द्ध्वमधश्चाशेषदिशश्चोद्भासयमानं कपिलर्षिमपश्यन्। ततश्चोद्यतायुधा—दुरात्मायमस्मदपकारी यज्ञविघातकर्त्ता हयहर्त्ता हन्यतां हन्यतामित्यधावन्। ततश्च तेनापि भगवता किञ्चिदीषत्परिवर्त्तितलोचनेनावलोकिताः स्व-शरीरसमुत्थेनाग्निना दह्यमाना विनेशुः। सगरोऽप्यनु-गम्याश्वानुसारि तत्पुत्रबलमशेषं परमर्षिकपिलतेजसा दग्धम् अंशुमन्तम् असमञ्जसः पुत्रमश्वानयनाय चोदयामास। स तु सगरतनयखातमार्गेण कपिलमुपगम्य भक्तिनम्रस्तदा तदा तुष्टाव यथैनं भगवानाह—गच्छैनं पितामहायाश्वं प्रापय, वरं वृणीष्व च पुत्र, पौत्रश्च ते स्वर्गाद्गङ्गा-मानयिष्यतीति।

अथांशुमानपि—ब्रह्मदण्डहतानामस्मत्पितॄणां स्वर्गाय अस्वर्गयोग्यानां स्वर्गप्राप्तिकरं वरमस्माकं भगवान् प्रयच्छत्वित्याह, तं चाह भगवान्—उक्तमेवैतन्मया पौत्रस्ते त्रिदिवाद् गङ्गां भुवमानयिष्यतीति, तदम्भसा संस्पृष्टे-ष्वस्थिभस्मसु एते स्वर्गमारोक्ष्यन्ति; भगवद्विष्णुपादाङ्गुष्ठ-

विनिर्गतजलस्य हि तस्याङ्गास्थि यत्र केवलमभिसन्धिपूर्वकं स्नानाद्युपभोगेषूपकारकम्, अनभिसंहितमपि अपेतप्राणस्यास्थिचर्मस्नायुकेशाद्युत्सृष्टं शरीरजं गङ्गापतितं सद्यः शरीरिणं स्वर्गं नयति; इत्युक्तः प्रणम्य च भगवतेऽश्वमादाय पितामहयज्ञमाजगाम। सगरोऽप्यश्वमादाय तं यज्ञं समापयामास, सागरं चात्मजप्रीत्या पुत्रत्वे कल्पयामास।

तस्याप्यंशुमतो दिलीपः पुत्रोऽभवद्दिलीपस्यापि भगीरथो योऽसौ गङ्गां स्वर्गादिहानीय भागीरथीसंज्ञाञ्चकार। भगीरथाच्छ्रुतस्तस्यापि नाभागस्ततोऽम्बरीषस्तस्मात् सिन्धुद्वीपस्तस्मादयुतायुस्तत्पुत्र ऋतुपर्णो नलसहायोऽक्षहृदयज्ञोऽभूत्। ऋतुपर्णपुत्रः सर्वकामस्तत्तनयः सुदासः, सुदासात् सौदासो मित्रसहनामा, योऽसावटव्यां मृगयागतो व्याघ्रद्वयमपश्यत्, ताभ्यां च तद्वनमपमृगं कृतम्। स चैकं तयोर्बाणेन जघान। म्रियमाणश्चासावतिभीषणाकृतिः करालवदनो राक्षसोऽभवत्। द्वितीयोऽपि—प्रतिक्रियां ते करिष्यामीत्युक्त्वान्तर्धानं जगाम।

कालेन गच्छता स सौदासो यज्ञमयजत। परिनिष्ठितयज्ञे चाचार्ये वसिष्ठे निष्क्रान्ते तद्रक्षो वसिष्ठरूपमास्थाय—यज्ञावसाने मम नरमांसं भोजनं देयं तत् संस्क्रियताम्, क्षणादागमिष्यामीत्युक्त्वा निष्क्रान्तः। भूयश्च सूदवेषं कृत्वा राजाज्ञया मानुषं मांसं संस्कृत्य राज्ञे

ततो भोजः साक्षात् पितरमिव राजानम् आनम्य सविनयं तस्थौ। ततस्तद्रूप-लावण्यमोहिते राजकुमारमण्डले प्रभूतसौभाग्यं महोमण्डलमागतं महेन्द्रमिव, साकारं मन्मथमिव, मूर्तिमत् सौभाग्यमिव भोजं निरूप्य राजानं प्राह देवज्ञः--राजन्! भोजस्य भाग्योदयं वक्तुं विरिञ्चिरपि नालम्, कोऽहमुदरम्भरिर्ब्राह्मणः। किन्तु तथापि वदामि स्वमत्यनुसारेण, भोजमितोऽध्ययनशालायां प्रेषय।

ततो राजाज्ञया भोजे ह्यध्ययनशालाङ्गते विप्रः प्राह--

पञ्चाशत्-पञ्च वर्षाणि सप्त मासान् दिनत्रयम्।
भोजराजेन भोक्तव्यः सगौड़ो दक्षिणापथः॥

तदाकर्ण्य राजा धातुर्यादपहृतमिव सुमुखोऽपि विच्छायवदनोऽभूत्। ततो राजा ब्राह्मणं प्रेषयित्वा निशीथे शयनमासाद्य एकाकी सन् व्यचिन्तयत्--यदि राजलक्ष्मीर्भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतः; यतः--

तानीन्द्रियाण्यविकलानि, तदेव नाम,
सा बुद्धिरप्रतिहता, वचनं तदेव।
अर्थोष्मणा विरहितः पुरुषः क्षणेन
सोऽप्यन्य एव भवतीति विचित्रमेतत्॥

किञ्च,

न यः शत्रुं व्याधिं वा प्रशमं नयेत्।
स पयात् तेन हन्यते॥

ततश्चैवं विचिन्तयन्नभुक्त एव दिनस्य तृतीये यामे एक एव मन्त्रयित्वा, वङ्गदेशाधीश्वरस्य महाबलस्य वत्सराजस्य आकारणाय स्वमङ्गरक्षकं प्राहिणोत्। स चाङ्गरक्षको वत्सराजमुपेत्य प्राह—राजा त्वामाकारयति इति।

ततः स रथमारुह्य परिवारेण परिवृतः समागतः, रथादवतीर्य राजानमवलोक्य प्रणिपत्योपविष्टः। राजा च सौधं निर्जनं विधाय वत्सराजं प्राह—

राजा तुष्टो हि भृत्यानां मानमात्रं प्रयच्छति।
ते तु सम्मानितास्तस्य प्राणैरप्युपकुर्वते॥

ततस्त्वया भोजो भुवनेश्वरी-विपिने हन्तव्यः प्रथमयामे निशायाः, शिरश्चान्तःपुरम् आनेतव्यमिति। स च उत्थाय नृपं नत्वाह—देवादेशः प्रमाणम्, तथापि भवदाज्ञानात् किमपि वक्तुकामोऽस्मि, ततः सापराधमपि मे वचः क्षन्तव्यम्;

भोजे द्रव्यं न सेना वा परिवारो बलान्वितः।
पश्यतोऽपि तवास्त्येष, स हन्तव्यः कथं प्रभो!

ततो राजा सर्वं प्रातः सभायां प्रवृत्तं वृत्तमकथयत्, स श्रुत्वा हसन्नाह—

जातः कोऽयं नृपश्रेष्ठ! किञ्चिज्ज्ञ सदसद्भविः।
यदुक्ता मन्त्रयाकारं कुमारं हन्तुमिच्छसि?

ततो भोजः साक्षात् पितरमिव राजानम् आनम्य सविनयं तस्थौ। ततस्तद्रूप-लावण्यमोहिते राजकुमारमण्डले प्रभूतसौभाग्यं नक्षोमण्डलमागतं महेन्द्रमिव, साकारं मन्मथमिव, मूर्तिमत् सौभाग्यमिव भोजं निरूप्य राजानं प्राह देवज्ञः—राजन्! भोजस्य भाग्योदयं वक्तुं विरिञ्चिरपि नालम्, कोऽहमुदरम्भरिर्ब्राह्मणः। किन्तु तथापि वदामि स्वमत्यनुसारेण, भोजमितोऽध्ययनशालायां प्रेषय।

ततो राजाज्ञया भोजे ह्यध्ययनशालाङ्गते विप्रः प्राह—

पञ्चाशत्-पञ्च वर्षाणि सप्त मासान् दिनत्रयम्।
भोजराजेन भोक्तव्यः सगौड़ो दक्षिणापथः॥

तदाकर्ण्य राजा चातुर्थ्यादपहृतमिव सुमुखोऽपि विच्छायवदनोऽभूत्। ततो राजा ब्राह्मणं प्रेषयित्वा निशीथे शयनमासाद्य एकाकी सन् व्यचिन्तयत्—यदि राजलक्ष्मीर्भोजकुमारं गमिष्यति, तदाहं जीवन्नपि मृतः; यतः—

तानीन्द्रियाण्यविकलानि, तदेव नाम,
सा बुद्धिरप्रतिहता, वचनं तदेव।
अर्थोष्मणा विरहितः पुरुषः क्षणेन
सोऽप्यन्य एव भवतीति विचित्रमेतत्॥

किञ्च,

जातमात्रं न यः शत्रुं व्याधिं वा प्रशमं नयेत्।
अतिपुष्टाङ्गयुक्तोऽपि स पश्चात् तेन हन्यते॥

ततो विदितवृत्तान्तो भोजः कुपितो ...
शोचितेश्वरः समेत्य प्राह—धाः पाप! राज्ञो ...
कुमारम् एकाकिनं मां राजभवनाद्बहिरानेतुं त...
नाम शक्तिः? इति वामचरण-पादुकामादाय ...
ताडयेत हतो वत्सराजः। ततो वत्सराजः प्राह—...
वयं राजादेशकारिण इति।

अथ यानं रथे निवेश्य, खड्गमपकोषं कृत्वा जगाम ...
महामाया-भवनम्। ततः पश्चिम-पयोनिधौ मग्ने मार्त...
मण्डले महामाया-भवनमासाद्य प्राह भोजं वत्सराजः—
कुमार! ज्योतिःशास्त्र-विशारदेन केनचिद् ब्राह्मणेन त...
राज्यप्राप्तावुदीरितायां राज्ञा भवद्वधो व्यादिष्ट इति।

भोजः प्राह—

रामे प्रव्रजनं, बलेर्नियमनं, पाण्डोः सुतानां वनं,
वृष्णीनां निधनं, नलस्य नृपते राज्यात् परिभ्रंशनम्।
कारागारनिषेवणञ्च, मरणं सञ्चिन्त्य लङ्केश्वरे
सर्वः कालवशेन नश्यति नरः, को वा परित्रायते?

ततो वटवृक्षस्य पत्रमादाय एकं पुटीकृत्य, जङ्घां छुरिकया छित्त्वा, तत्र पुटके रक्तमासिच्य, तृणेन कस्मिंश्चित् पत्रे कञ्चन श्लोकं लिखित्वा वत्सराजं प्राह—महाभाग! एतत् पत्रं नृपाय दातव्यम्, त्वमपि राजाज्ञां विधेहि इति।

ततो वत्सराजस्यानुजो भ्राता भोजस्य प्राणपरित्याग-समये दीप्यमानमुखश्रियमवलोक्य प्राह—

'एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥'

ततो वैराग्यमापन्नो वत्सराजः भोजम्—क्षमस्व इत्युक्त्वा, प्रणम्य च तं रथे निवेश्य, नगराद्बहिर्घने तमसि गृह-मागमय्य भूमिगृहान्तरे निक्षिप्य भोजं ररक्ष ।

भोज-लक्ष्मीधरयोः

कदाचिद् द्वारपालकः प्रणम्य भोजं प्राह—राजन्, द्रविडदेशात् कोऽपि लक्ष्मीधरनामा कविर्द्वारमध्यास्त इति । राजा—प्रवेशयेत्याह । प्रविष्टस्तु सूर्यमिव विभ्राजमानं चिरादप्यविदितरूपात्मं प्रेक्ष्य राजा विचारयामास, प्राह—

आकारमात्रविज्ञान-सम्पादित-मनोरथाः ।
धन्यास्ते ये न शृण्वन्ति दीनाः क्वाप्यर्थिनां गिरः ॥

स चागत्य तत्र राजानं स्वस्तीत्युक्त्वा तदाज्ञयोपविष्टः [illegible] इयं ते पण्डितमण्डिता सभा, त्वञ्च [illegible] मतः किं नाम पाण्डित्यं मम, तथापि

किञ्चिद् वच्मि—

> भोजप्रतापन्तु विधाय धात्रा
> शेषैर्निरस्तैः परमाणुभिः किम् ।
> हरेः करेऽभूत् पविरम्बरे च
> भानुः पयोधेरुदरे कृशानुः ॥ इति ।

ततस्तेन परितुष्टमनसा, राजा च तस्य प्रत्यक्षरलक्षं ददौ। पुनः कविराह—देव, मया सकुटुम्बेनात्र निवासाशया समागतम् ।

> धर्मी दाता गुणग्राही स्वामी पुण्येन लभ्यते ।
> अनुकूलः शुचिर्दक्षः कविर्विद्वान् सुदुर्लभः ॥ इति ।

ततो राजा मुख्यामात्यं प्राह—अस्मै गृहं दीयतामिति । ततो निखिलमपि नगरं विलोक्य क्वापि मूर्खं अमात्यो नापश्यत् यं निरस्य विदुषे गृहं दीयते। तत्र सर्वत्र भ्रमन् कस्यचित् कुविन्दस्य गृहं वीक्ष्य कुविन्दं प्राह—कुविन्द, गृहान्निःसर, तव गृहं विद्वानेष्यतीति ।

ततः कुविन्दो राजभवनमासाद्य राजानं प्रणम्य प्राह—देव, भवदमात्यो मां मूर्खं कृत्वा गृहान्निःसारयतीति त्वं तु पश्य मूर्खः पण्डितो वेति—

> काव्यं करोमि न हि चारुतरं करोमि
> यत्नात् करोमि यदि चारुतरं करोमि ।
> भूपालमौलि-मणिमण्डित-पादपीठ,
> हे साहसाङ्क, कवयामि वयामि यामि ॥

ततो राजा त्वङ्कारवादेन यदन्तं कुविन्दं प्राह—ललिता ते पदपङ्क्तिः कवितामाधुर्य्यञ्च शोभनम्, परन्तु कवित्वं विचार्य्यं वक्तव्यमिति। ततः कुपितः कुविन्दः प्राह—देव, वक्तव्यमत्र भाति किन्तु न वदामि, राजधर्म्मः पृथग् विद्वद्धर्म्मादिति। राजा प्राह—यदि चेदुत्तरं ब्रूहीति। स आह—देव, कालिदासादृतेऽन्यं कविं न मन्ये, कोऽस्ति ते सभायां कालिदासादृते कवितातत्त्वविद् विद्वान् ?

भोज-शकुन्तक-मरालानाम्

पुरे परिभ्रमणं कुर्वाणे राजनि वर्त्मनि चोरद्वयं गच्छति। तयोरेकः शकुन्तकः प्राह—सखे, स्फारान्धकार-विततेऽपि जगत्यञ्जनवशात् सर्व्वं परमाणुप्रायमपि वस्तु सर्व्वत्र पश्यामि, परन्तु सभार-गृहानीत-कनकजातमपि न मे सुखायेति। द्वितीयो मरालनामा चोर आह—आहृतं सभारगृहात् कनकजातमपि न हितमिति कस्माद्धेतोरुच्यते ?

ततः शकुन्तकः प्राह—सर्व्वतो नगररक्षकाः परिभ्रमन्ति, सर्व्वाऽपि जागरियत्रीणां भेरीपटहादीनां निनादेन, तस्मादा-हृतं विभज्य स्वस्वभागागतं धनमादाय शीघ्रमेव

गन्तव्यमिति। मरालः प्राह—सखे, त्वमनेककोटिद्रव्य-परिमित-मणिकनकजातेन किं करिष्यसि?

मकुन्दकः। एतद्धनं कस्मैचिद् द्विजन्मने दास्यामि, यथायं वेद-वेदाङ्ग-पारगः अन्यत्र प्रार्थयते।

मरालः। सखे, शृणु;

ददतो युध्यमानस्य पठतः पुलकोऽथ चेत्।
आत्मनश्च परेषाञ्च तद्दानं पौरुषं स्मृतम्॥

अनेन दानेन तव कथं पुण्यफलं भविष्यति?

मकुन्दकः। अस्माकं पितृ-पैतामहोऽयं धर्मः यशोऽर्थमेव वित्तमानीयते।

मरालः। शिरश्छेदमङ्गीकृत्यार्जितं द्रव्यं निखिलमपि कथं दीयते?

मकुन्दकः।—

मूर्खो न हि ददात्यर्थं नरो दारिद्र्यशङ्कया।
प्राज्ञस्तु वितरत्यर्थं नरो दारिद्र्यशङ्कया॥
किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम्।
पात्राणामुत्तमं पात्रं शूद्रान्नं यस्य नोदरे॥

अनेन वित्तेन किं करिष्यति भवान्?

मरालः। सखे, काशीवासी कोऽपि विप्रस्तुरगागात्, तेनास्मत्पितुः पुरः काशीवासफलं व्यावर्णितम्, ततोऽ-

ततो राजा लद्वारयादेन यदत्तं कुविन्दं प्राह—ललिता ते पदपङ्क्तिः कवितामाधुर्य्यञ्च शोभनम्, परन्तु कवित्वं विचार्य्यं वक्तव्यमिति। ततः कुपितः कुविन्दः प्राह—देव, भवान्तरं भाति किन्तु न वदामि, राजधर्म्मः पृथग् विद्वद्धर्म्मादिति। राजा प्राह—अस्ति चेदुत्तरं ब्रूहीति। स आह—देव, कालिदासादृतेऽन्यं कविं न मन्ये, कोऽस्ति ते सभायां कालिदासादृते कवितातत्त्ववित् विद्वान्?

भोज-शकुन्तक-मरालानाम्

पुरे परिभ्रमणं कुर्वाणे राजनि वर्त्मनि चोरद्वयं गच्छति। तयोरेकः शकुन्तकः प्राह—सखे, स्फाराध्वकारविततेऽपि जगत्यञ्जनवशात् सर्व्वं परमाणुप्रायमपि वस्तु सर्व्वत्र पश्यामि, परन्तु भाण्डार-गृहानीत-कनकजातमपि न मे सुखायेति। द्वितीयो मरालनामा चोर आह—भाण्डारगृहात् कनकजातमपि न हृतमिति कस्माद्धेतोरुच्यते?

ततः शकुन्तकः प्राह—सर्व्वतो नगररक्षकाः परिभ्रमन्ति, सर्व्वाऽपि नागरिकाल्ल्येयां भेरीपटहादीनां निनादेन, तस्मादाद्भुतं विभज्य स्वस्वभागागतं धनमादाय शीघ्रमेव

एतस्मात् बाल्यादारभ्य चौर्यं कुर्वाणो दैववशात् स्वपापा-विरक्तो वैराग्यात् सकुटुम्बः काशीमेष्यति ; तदर्थमिदं द्रविणं जातम् ।

गङ्गुवाकः । महदाश्चर्यं तव पितुः, तथाहि—

वाराणसीपुरीवास-वासना-वासितात्मनः ।
किं शुना समतां याति वराकः पाकशासनः ॥
अपरं कर्मसम्बन्धानां सेयं वाराणसीपुरी ।
यत्र संलभ्यते मोक्षः समं चण्डालपण्डितैः ॥
मरणं मङ्गलं यत्र, विभूतिश्च विभूषणम् ।
कौपीनं यत्र कौशेयं, सा काशी केन मीयते ?

एवमुभयोः संवादं श्रुत्वा राजा तुतोष, अचिन्तयच्च मनसि—कर्मणां गतिः सर्वथैव विचित्रा, उभयोरपि पवित्रा मतिरिति ।

भोज-विप्र-विदग्धकुटुम्बानाम्

कदाचिद्राजा धनिकजनमध्ये मार्गं प्रयागच्छन् कमपि विप्रं ददर्श । तस्य करे धर्ममयं कमण्डलुं चोदन् स वाल्मीकिः ज्ञात्वा मुग्धधिया विप्रसमागमसमालोक्य कूपं हृदये निधायाह—विप्र, धर्मार्थं श्रमयैः पाणौ

वहसीति। स च विप्रः नूनं मुखशोभया मृदुतया च भोज इति विचार्याह—देव, वदान्यगिरोमणौ भोजे पृथ्वीं शासति लोहताम्राभावः समजनि, तेन चर्ममयं पात्रं वहामीति।

राजा—भोजे शासति लोहताम्राभावे को हेतुः?

तदा विप्रः पठति—

> यस्य श्रीभोजराजस्य द्वयमेव सुदुर्लभम्।
> शत्रूणां शृङ्खलैर्लोहं, ताम्रं शासनपत्रकैः॥

ततस्तुष्टो राजा प्रत्यक्षरं लक्षं ददौ।

कदाचिद्द्वारपालः प्राह—धारेन्द्र, दूरदेशादागतः कश्चिद् विद्वान् द्वारि तिष्ठति, तत्पत्नी च तत्पुत्रः सपत्नीकः; अतः चतुर्विधं विद्वत्कुटुम्बं द्वारि तिष्ठतीति।

राजा—अहो गरीयसी शारदाप्रसादपद्धतिः।

तस्मिन्नवसरे गजेन्द्रपाल आगत्य राजानं प्रणम्य प्राह—भोजेन्द्र, सिंहलदेशाधीश्वरेण सपादशतं गजेन्द्राः प्रेषिताः षोडश महामणयश्च।

ततो माघः प्राह—

> स्थितिः कवीनामिव कुञ्जराणां
> स्वमन्दिरे वा नृपमन्दिरे वा।
> गृहे गृहे किं मशका इवैते
> भवन्ति भूपाल विभूषिताङ्गाः?

ततो विप्रपुत्रं प्राह राजा—विप्रसुत, त्वमपि पठ
विप्रसुतः।—

विजेतव्या लङ्का, चरणतरणीयो जलनिधिः
विपक्षः पौलस्त्यो, रणभुवि सहायाश्च कपयः।
पदातिर्मर्त्योऽसौ सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे॥

तुष्टो राजा विप्रसुताय अष्टादश गजेन्द्रान् प्रादात्।

